श्रीगणेशायनमः॥ ॥अविघ्नमस्तु॥ ॥अथमोहनभट्टविरचितंकंसवधमहाकाव्यंप्रारभ्यते॥ ॥श्री
पतेश्चरणयोर्नखप्रभाभासुरेतिरभसादशंकितं॥आदधातुहृदिमेसरस्वतीनूपुरस्वनमनोहरंपदं॥१॥
शब्दशास्त्रमनधीत्यतत्फलंधीयेगंतुमलसाःसमुत्सुकाः॥तान्निमित्तमिदमीदृशंमयाकेशवस्यचरि
तंनिबध्यते॥२॥संधिसुप्रकरणेरुन्ध्यधिक्रियाकारकाप्ययुसमासतद्धितौ॥तिङ्समाहिपदयोर्व्यव-
स्थितिर्लार्थगीःकृतइतीहसंग्रहः॥३॥प्रायशःपदसमुच्चिकीर्षयालंघितेपिकविपद्धतिक्रमे॥श्रो
तुमर्हतिजनस्तदास्थयाकापथोप्यभिमतःसदर्थभाक्॥४॥राजभिर्दितिसुतांशजन्मभिर्भारतोव
सुमतीनिपीडिता॥अभ्युपेत्यनिजरक्षकारणंसंजगादकिलपद्मयोनये॥५॥नाकिभिःसहभुवोनुकं
पयाप्रेरितःप्रकृतिसंनिकृष्टया॥क्षीरसिंधुशयमच्युतंगतःस्तोतुमेवमुपचक्रमेविधिः॥६॥जह्य
घानिजगतांजगत्पतेविश्वपास्यपदमद्भुतंनमः॥मर्त्यपिप्रमुरदेस्यपन्नगास्थित्यपायभवकारणा
यते॥७॥कांतधातुषुनिघातशालितायस्ययश्चलनुबंधइष्यते॥८॥श्वर्तातदभिधेयवामतानाथ-
नास्तिभवदन्यवर्त्तिनी॥९॥मंगलप्रकृतयेदयालवेनायकायजितपावकोजसे॥पुण्यकीर्तयइह
क्षितौइमेतुभ्यमीशनमयामहेशिरः॥१०॥केनभाव्यमनघेनभव्यताकस्यदेवभवतःकृपांविना॥
क्षेयमेवनुतमोस्यकिंपुनःक्षय्यमांतरमजय्यजायतां॥११॥इंदिरेशभवतःपदोदकंतत्परस्यसुकृ
तोदयईयो॥मूर्ध्निबिभ्रदनिशंसुरैर्नतोयस्यवेदमहिमानमीश्वरः॥१२॥पश्चिमस्थितिपुरःस्थित
स्यतेप्रत्ययेघनुगतस्यनाशवत्॥ईश्वरस्यसदसद्विशेषणंकल्पितंगमुखिवलविवेकिभिः॥१३॥प्रे-
ष्यधन्यविनयादुपैधतेयस्यधीस्त्वयिभरोहिदेहिनां॥त्वत्पदंकथमुपैतुनामसश्रीगुणोघनिधुतें
द्भवंभवं॥१४॥प्रौढवानभुवमुपेत्यकोलतांप्रौढदैत्यमवधीन्नृसिंहतां॥मीनतामुदहरःश्रुतीरिति
स्वैरितातधविचित्रकेलिषु॥१५॥भक्तिगम्यतवधामलिप्सयाकृतानिसुकृतैर्हिमस्त्रियः॥आ
गमुकुगमकृत्यस्यधीरिव इतिखेदः॥

मधुद्विषिरहादृणार्णवंबंधनायनभुतस्यतान्यपि॥१५॥अग्निवत्त्वदुरितान्युपोषतिप्रेजतेरुषिभिरं
शुमानिव॥योगिभाषिनसुरवार्तमीशतेधामभक्तिपरवानुपाश्रुति॥१६॥अस्फुटंहृकनिपातमापतत्य
तकेजनमुपेडकीयति॥वीतसंभ्रममुपेडकीयतातावकेनपुरुषेणभूयते॥१७॥श्रीर्भवभ्रमरहर्ली
पयाहृतेवीक्षिताद्विषदुरःस्थलेजलेजनेः॥निर्गतात्वदनुसारिणीयथारामनामनितवैवजन्मनि॥
॥१८॥संनिधेस्तवविधूदयादिषुध्वांतमस्तमितमस्तयेवुनः॥अथवेहिजगतांमनोगतंतुभ्यमेक
विदुषेकिलोनमः॥१९॥सायकश्चटितितेशरासनान्निष्पतन्किलजघन्यमीक्षितः॥पूर्वमाजिषु
पटत्पटेतिभूःपातुकेररिशिरोभिराकुला॥२०॥अंतकोतुभयमूषिकायितंलोकमायुतगवा-
ग्रहानतः॥ओअगोचरविनिद्रतांगतोगोधिपानुजगवेंद्रनंदन॥२१॥आअमीअमरदैत्यमान-
वास्त्वावदंधतमसास्थिताइव॥यावदार्तशयनस्त्वमाइमेअक्षिणीइनविधूअनंतते॥२२॥नोउपे
क्षितुमलंभवान्भुवंभारभंगुरतलांविभोइति॥कांक्षितोसिफणितल्पमुत्सृजन्नस्तिवाकि-
मुअगोचरेतव॥२३॥किंत्वसावपिदयाईमानसामर्त्यदेवतऋषिव्यपेक्षया॥योगनिद्रतुलं
घितद्रुमंभृंगयोषिदिवनप्रहास्यति॥२४॥देहिदर्शनमजेतिहृत्तः प्लावितःस्वरमुदीरयत्यपि॥मा
जनिष्टगुरुमत्सराजनेश्रीरहःप्रणयभंगदर्शिनी॥२५॥षण्णगर्यइवधीद्वियोत्थितावुद्यावियय
भेदसंकुलाः॥ग्राम्यलोकइवविस्मयाकुलस्तासुकोनजगदीशमुह्यति॥२६॥त्वल्लयंत्वदुदयंत्वदाश्रि
यंत्वन्मयंयदखिलंजगद्धरे॥वीतनिद्रभगवन्छुभापहैरुतमानतदपांगदर्शनैः॥२७॥नप्रशांतनुत
दंशयांभधानप्रशांतनुतसंचरांगतिं॥एत्यतांतरतिकोभवविशद्व्यतांतरतिरापदंहिसः॥२८॥त्व-
द्भोविजयतेजयाश्रियानंदकस्यविलसंत्सरूपितः॥आच्छिनत्तुभवजंपरिश्रमंवंदनेनकिलसं-
स्तरूपितः॥२९॥मायथापिनिजधामनित्वयाचक्रशाङ्गदरनंदकिद्भुते॥त्वत्फणासुरुमध्यथामहीप्रो

दलांगलसुनंदकिंनुते॥३०॥नूंपुनीहिपरवानुकंपयापुंस्यनेभृगुकुलैकपुंगव॥उग्रमप्यनघधर्मशासि
नंस्वच्छमेघचरितंतधाखिलं॥३१॥यःपरंगगनसमस्थितस्थाणुवद्दिगवनोसमास्थित॥यस्यभाः-
सयवतीनभानुवत्तत्किलत्वमसितस्वमेश्वरं॥३२॥ध्यानमात्रधुतसर्वकिल्बिषेसर्वलोकगुरुभिःपुर-
स्कृते॥संयमात्वयिनिवेशितात्मनःस्वःशिरःपदमधस्यदायते॥३३॥स्वक्रियापरमिदंयदुच्यतेदानहो
मयजुनादिकंविधौ॥तेननूनमधुधःप्रतारितःपात्यतेसुकृतिनीशिरस्यदात्॥३४॥आशुभावहसिनि
ग्रहंमुहुःकामपूर्वविहितागसामपि॥आचरेयुरपिजातुचेतसस्तोषणंसुकृतमित्यपेक्षया॥३५॥ज
नःप्रभृतिरक्षितस्त्वयावर्धतेजगतियद्ययंजनः॥वांनवितयतिचक्षणंततानिष्कृतिंकथमुपागमिष्य
ति॥३६॥अस्मदादिमभुग्ग्रहंतोजनंदृश्यतेनघतवप्रयोजनं॥दीनसंश्रयतयात्मनोयशस्कामुकत्व
मपहायनापरं॥३७॥सर्वतस्तवविदात्मनोन्वयाद्विश्वमेवविदिवप्रकाशतां॥लोहकांतमणिसंगमा
द्यथास्वाभमीशवरवत्प्रवर्तते॥३८॥संज्ञयानघतवभ्रुवोर्धनुःकल्पराजिरमणीयरूपयोः॥एषसंह
रतिलोकमंतकःक्रव्यजातमिधनेगमोनिशि॥३९॥यांजगन्मयमरेवदविक्रिरन्नाशयत्यमरनाम
भिर्जडं त्वदृयंचजनतांहविक्रिरन्नाशयत्यहिकुलंबलेनयः॥४०॥कःकविस्तवगुणाभशेषतःकस्य
तेगणयितुंसुगण्यपि॥आशुतोषपरितोषणायतेदेवकेवलमलंनमस्क्रिया॥४१॥तद्धुवभुवनसं
श्रयाधुनाद्रुतोर्मिनिचयोस्तिरस्कृतां॥क्षनधाधतरजाइपद्धूधारणार्णवादिवपुरासमुद्धरा॥४२॥इत्व
दीरयतिगांप्रजापतेरेचितःसघृणयेवनिद्रया॥एकशोनुजगृहेदिवौकसःकेशवःस्मितविविक्तया
दृशा॥४३॥विग्रहेपरिणतंसुरद्विषांव्यक्तसंधिरुणमप्युदीरितं॥तद्द्वोविरुरुचेस्वयंभुवःसुग्रहंनव
विदांहिनेंगितं॥४४॥आत्मनःकिलवपुःसमक्षतांनीतमाश्रितजनाद्यविद्रुभा॥नाभवन्निजरुचातिर
स्कृतंव्यक्तलक्षणमहर्पतेरिव॥४५॥सप्रजापतिवचोनुरूपयासंहिताधिकविशेषसंपदा॥अभ्यधत्त

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

परिपूर्णयागिराधाविसन्प्रथयतींगितज्ञतां॥४६॥किंनवेद्मिभवतांमनोगतंरुक्मतांचममसानिजांग
वत्॥क्षांतिरस्तिपुनरप्रयन्मयातन्निबोधतकथाप्यपेक्षया॥४७यत्परस्यसुजनःपराङ्मुखःसंमुखोप
कृतयेपृथग्जनः॥अंतरंतदुभयोश्चिरादहोरात्रवत्सहजमेधगद्यते॥४८॥तन्यपीडितधृतिर्नसज्जनः-
सागसिप्रतिकरोतिदुर्जने॥तन्वपीडितगुणत्वमात्मनस्तस्यपीडितनोरपीक्षितं॥४९॥उन्नतस्यगुण
मस्पृशंल्लघुर्वाग्भिरेवतमतिप्रवर्त्तते॥तेनवास्यपुनरद्योगतीरागवांस्तद्बुधोनबुध्यते॥५०॥सेव-
नीयमभिताशयेःक्षणंलंघयन्नपिसुचिंमलीमसः॥अस्तमेतिसहसासरस्यतोनाव्यमंत्रइवरेणुरा
यसः॥शास्त्रिनःकलमिवागुणप्रियोवर्धमानइतिसंप्रतीयते॥तंतुपक्रिममुदीक्षतेविधिर्भंशनाय
सुकरोभवेदिति॥५२॥न्यंकदारइतिकर्मकारितोभेदइत्यमलयोपपादितं॥वामनेनवपुषार्थ्युरुक्र
मः प्रांशुनेत्यहितिसूनुलीलया॥५३॥उद्धृसन्मृतकयोःपरोगुरुःसंधसद्भ्यसुरघेषुयोरतः॥ताद्-
शस्यहिभरायकल्पतेनाद्रिसिंधुवनधारिणीधरा॥५४॥किंमितागसिदमोघतःशठेशासिताजन
यितासिशाविव॥अर्थ्यनाक्रमणशिक्षयेवसकेवनिर्दयविधिःकसाधुता॥५५॥नोत्सृजत्यघ
मुपेक्षितोधमःकिंचिरादलमुपेक्षितुंप्रभुः॥तत्वमुद्सहिनबुध्यतेतरानासतोनिरसनाद्रतेशमः॥
॥५६॥स्थीयतेसमतयाधिरोहणीतुल्यवृत्तिमहतांसमज्यया॥आत्मनोगतिवशेननीचकैरुच्चकैर-
पिभवंतिसंश्रिताः॥५७॥दुर्जनंप्रतिमभिमुखतीश्वरःसंस्कृतंविविधयापिक्षिप्तया॥अन्यथापुनर
॥वर्त्मनोगुरुतंनिरस्यकिलसंस्करोतिगा॥आगमस्थितिमिवान्यदर्शनेदूषितामनभिजातवर्त्मभिः
नेतुमार्यपदवींसमाधिनाडुष्करंतमनीषिणामपि॥५९॥येषामन्यसवर्णतोपजनिताप्रायःस्वसि
द्धिःस्फुटंयान्भूत्वास्तगुणेनकेवलकृपासामर्थ्यमाविष्कृतं॥प्रायस्येनचनामभाग्रगणनेयेषांनरू
द्धाश्रुतिःप्रास्कारायितमूर्तयोजहतितेनार्याःस्वतोगोरवं॥६०॥अचिरेणनिरस्तभारपीडासवनिर्द्द-

॥२॥

स्यथनस्यस्यमार्याः॥वसुदेवसुतस्यभाविनोमेधुरिभोगैर्भजतावतारमुर्थ्यां॥६१॥सीरांभोधेःसुतायाः
श्रुतिपरुषपदांविप्रवासाभ्रियत्वाद्यामुक्त्वावाचमंतर्हितवपुरभवद्वीडयेवाशुचक्री॥तांविधकश्चोतयं
तीममृतमिवनिजांगेघभीष्मानुबंधात्प्राप्यानंदादमात्रेवियतिसुमनसोधामतेस्वंसमीयुः॥६२॥ ॥
इतिश्रीमहाराजदेवीसिंहाज्ञानुवर्त्तिनःकविपंडितापरनाम्नोमोहनभट्टस्यकृतौआनंदांकेपदस
मुच्चयेमहाकाव्येसंधिसंग्रहोनामप्रथमःसर्गः॥ ॥पुरस्कृतांशूरसुतेनभर्त्रास्नेहात्स्वयंप्रग्रह
मन्निनाय॥रथेनकंसःप्रमनाःस्वसारंनाम्नानिरूढांकिलदेवकीति॥१॥धूवरोतादृशहार्दवृत्तिकंसे
विरेणाभिननंदतुस्तौ॥संमानएवस्वजनस्यरागःस्यादभ्यदयस्यपुनःप्रकारः॥२॥दायप्रदानातिश
येनराज्ञस्तथायथाप्रश्रयसंभ्रमेषु॥पौरायुर्विस्मयमीश्वराहिप्रायोवदान्यानतुशीलवंतः॥३॥
तमुत्सवंमत्सरिणीधतावत्कंसस्यदेवीवचसानसेहे॥अलक्ष्यदेहाकिलयाविरासीत्सद्योविषादा
यमनोहरंती॥४॥कंसस्वमित्यंगुरुणादरेणरथंसमारोप्यगृहीतरश्मिः॥यांधामपत्युर्वहसाहत-
स्यागभीष्मस्त्वांनिहनिष्यतीति॥५॥निर्घातपारुष्यमिवाक्षिपंतीतांवाचमाकाशभवांनिशम्य
॥अकारिकंसेननिजाननस्यासंपूर्णराहूपतुंशोभा॥६॥भयप्रतीकारपरस्यतस्यनिदाननाशा
यमतिर्बभूव॥प्रायःप्रवृत्तिःपुरुषाधमानांनयेप्यधर्म्यप्रतिभानुविद्धा॥७॥स्नेहार्द्रतामेकपदेवि
लंघ्यसदेवकींहंतुमसिंचकर्ष॥तथाविधाहिप्रकृतिःखलानांशेषंबुधावेकृतमामनंति॥८॥न्यायेन
कंसायविमोहयिष्यन्निर्वंचवःशूरसुतोबभाषे॥धीरोहिबुध्याभयमुत्सृजतिप्रास्यागतस्तद्विव
रंपिधत्ते॥९॥त्वयामहीपालगुणातिरेकात्प्रदीपताभोजकुलेभिनीता॥तदंजनोत्पानमिवोभयेन-
तमानामलंघिष्यतयशोविघातः॥१०॥उभेशरीरेकृतिनोवदंतिभूतस्वभावंचयशोभिधंच॥निर्णीतिना
शेप्रथमेनिरास्थाःसंतोद्वितीयेविकृताभियोगाः॥११॥नायुष्यहंधीरहरेकमंतेतस्यास्यनागामिस
तोविशेषः॥इत्थंगतेजीवितवृद्धयाकःकुर्याडपेक्षीयशसांडुगोरे॥१२॥अतिप्रियंजीवितमेवयेषां-

कीर्तिश्चितेषामपिवल्लभेव॥पूर्वैर्हितामव्यथयद्भिरेवतैः प्राणसंरक्षणमेषितव्यं॥१३॥चेत्साधुशब्दा
र्थमपीडयित्वानशक्यतेधारयितुंशरीरं॥प्रियात्मनांमुख्यगुणानुसंगात्सभ्यस्तदाकीर्तिविपर्ययो
पि॥१४॥अथोपलभ्येतसहस्रतम्यामुपायकोटोयशसोनपायः॥तस्यानुसारोर्थविरानहेयः प्रा
योह्यशक्योनुशयः प्रमार्ष्टुं॥१५॥उद्देश्यमगुणेनयातःफलांतरंयावहतोधभुज्य॥आत्तंतदन्यावन्ना
नायपुंसामार्गस्यवैषम्यमपेतवोद्यं॥१६॥नैकांततस्तावदगुण्यमेवगुण्येवकिंचिदपीहकार्यं
संचारिणादोषगुणान्वयेनरात्रिंदिवेनेवजगत्परीतं॥१७॥गुणाधिकत्वग्रहणस्यहेतुर्दोषातिरेकः
परिवर्जनस्य॥संख्यायसर्वत्रविशेषमेनंततःप्रवर्त्तेतबुधःक्रियासु॥१८॥दंष्ट्राफणाभ्यामिवदे
हुषाभ्यांभूःकार्यसंपत्सकलोभकाभ्यां॥धृत्याविवेकेनचसावलंबादूरीभवन्मत्सरलोभका
भ्यां॥१९॥अर्थाद्विधारंभविपाकरम्यास्तत्रोभयेषांवरमुत्तरेये॥तथाहिपूर्वेनुशयायसर्वेरघला
इवव्याजमयोपचाराः॥२०॥ताराइवव्योम्निरवाविधोस्रारत्नप्रभेदाइवसिंधुनाथे॥नात्येगुणा
स्त्वव्यमलास्तदंतर्दोषस्यलेशोपिपतन्नभाति॥२१॥दिगंगनानामिवयेतरेमीत्सतांतरेनेधगुणाःस्फु
रंति॥राज्यंसहस्रेविभजत्यतिघ्नत्वव्येकनोषः किलराजशब्दः॥२२॥स्वानांप्रियाणापगमेसमेषां
स्वानांसमामृद्धिरिवेतिधत्से॥स्वाएधनत्वांशिरसावहंतेकिंभूयसारेचपरेचविश्वे॥२३॥येःश्रीम
दःस्वादवरोपितोयेपूर्वापराणीचरमेनगण्याः॥भवादृशाएवभुवःपतंतेसंतातिसर्वेविहिताःप्रक
र्षे॥२४॥येषांधरायेन्यइतिप्रकर्षंगतेमहिम्नस्त्वयिसन्नयेषु॥महीभृतस्तोहितथेपिहूरान्नीचेस्व
मायांतिनिजैःशिरोभिः॥२५॥भोजान्वयायस्तवजन्मनासोसिंधुःसुधांशोरिवभूपतोभूत्॥तन्वय
कस्मारभिषज्जमानंनमर्थयेत्वव्यविवेकलक्ष्मा॥२६॥यावत्कुरूणांक्षितिमुत्तराणांनयेनहूरंनृपु
त्रेभनीतं॥व्यावर्त्ततेस्मिन्विपरीतवृत्तोयशस्तवोर्मारिवधारिसिंधोः॥२७॥धैर्येणपूर्वायपराधरस्थो

महाघवायेवकृतस्पृहस्ते॥भंगायसीमस्त्वयिवर्तमानेकीलोजनश्चेतसिविस्मयेन॥२८॥कौतस्कुतः
परयतिरंध्रदर्शीपुर्यंतरायांसहितोजनोधः॥एवंपुरस्तात्प्रसमीक्ष्यपश्चात्कृतोथनिंद्यस्तवकामचारः॥
॥२९॥यथाद्वितीयाद्वितरस्यलज्जातथाभिनीतस्यनिजात्मनस्तः॥पूर्वोयथानात्मनिदुःखमिच्छेदन्यस्तथा
श्लाघ्यमतिर्द्वितीये॥३०॥आथाहकल्याणविधोप्रवृत्तेसंमानितांमानयितव्यशीलां॥चित्रंमहद्यन्न
नृपस्यसारंकनीयसीप्रत्यसिमुद्रेरस्त्वं॥३१॥अलक्ष्यवाक्प्रत्ययमात्रतस्तेविलंघितोभातिनसाधु
मार्गः॥पुंदोषवेधुर्यमनोहराधाकिंसाध्यवज्जेभुतयोतंत्रो॥३२॥प्रायःप्रमादादिभिरध्वपुंसांवान्वः प्र
यंतेनुगतार्थकल्पाः॥तत्प्रेयःसांशयिकेष्टमात्रेनार्घ्यःकिमेगाधधृतात्मयेपि॥३३॥अशुद्धमूलेपिज
नप्रवादेलभेतकामंपुरुषःस्वमर्थं॥उपक्रमेत्वन्यतमाःप्रहासंतन्वंतियंतेनपुनस्त्यजंति॥३४॥तवा
हितोस्यांभवितांकिलेतिनेतावतेयंनृपसापराधा॥संबंधमात्रेणतथाविधत्तेतत्तावदात्मापिनतज
हाति॥३५॥अनागतेनेवतथाप्रियेणकृतव्यलीकावरजानथाच्या॥भूतेनिमित्तेहिनिमित्तवंतःका
र्यानुकूलव्यपदेशभाजः॥३६॥तदुद्यतोभाविनिलंभनीयस्त्वयासिरस्याप्रसवंसाय॥पित्रावरु
व्यस्तनृपःस्वभावःकांतार्थितेनेवनिजप्रजायाः॥३७॥रूपाममुष्यामनवुध्यपश्चाद्भविमोस्व
न्नपिनासिनिंद्यः॥इत्यःशिफापालनयोपयोगीशारपाव्यपायोपिरवप्रभुत्वात्॥३८॥शोरेर्गिरफ
त्वगुणपूरपास्यसारंविविक्तंगुरुधारयंती॥ससंकराभोजवरस्यबुद्धिःपूतारवलघ्नःक्रियथेवरव
स्या॥३९॥सारेणतस्याहृदयंगमेनयूछासुधायाइवशोरिधान्वः॥३९॥तस्याद्भुतंमृत्युभयानुबंधित
मोयथानिर्जरसोजनस्य॥४०॥स्नेहव्यपायाधिकलाघवेनतत्पार्थिवस्याशुरजोविकीर्त्यौ॥मासोन
वाहृष्टिरिवोत्तरस्यशुभ्रान्निनायास्यमृदुःकथांतं॥४१॥सायाहनीवानयसंभ्रमेसावुत्थायरागः
सहसाशशामा॥यथाद्रिगंतस्यतथैवनेतुर्जातमित्रेवमुखंजुहूहू॥४२॥मृत्योरिवांतवदनादपेतस्व

MEMORIAL

प्रेयसीं प्रीतिविकासितास्यां क्रियाभिनंदन्निव हृद्विवंशग्रामण्यमाभाषत भोजभर्ता॥४३॥ यत्किंस
खेवातिसखेर्गुणानेभ्रश्यान्यहं नस्खलितो नियत्या॥ त्वय्यत्रनप्रत्युपकर्तुमीशो सख्याविवस्वम
मयेविशुद्धे॥४४॥ उच्चैःपदं भूपतयः समाधिगतानियम्यद्विषतो यथासून्॥ दुर्नीतिवर्जास्त्वथयांतिसि
द्धिं संगादतिस्त्रैरिव योगवंतः॥४५॥ श्रियाकरभ्यापि भुवस्तमोंधा रज्यंतिदुष्कर्मणि विस्मृतेशाः॥ सीद
तिचप्रेत्य भुवाशुवार्ताः काराभुवेवाधिकृतानिरस्ताः॥४६॥ निवृत्तसंज्ञेनसताधिगम्यं परोक्षकल्पंम
रणंतरिष्यन्॥ स्वसुर्वधादंकमयं पुनस्तत्प्रत्यक्षतां संप्रतिनेतुमीहे॥४७॥ द्योस्तोयदानां पदवीमहीं
तिस्वाक्रांततिस्त्रो विभवान्महिम्नः॥ क्रमाद्धार्यस्यहरेरिवैते गुणाः समं पश्यततानिवैनान्॥४८॥
शुद्ध्यायथासोमपिशीधुपेयवानेप्रमीदंतिनिवाशुगत्या॥ दीप्त्यामणावश्मनिवाविशेषः साधावना
र्यैचतथाप्रकृत्या॥४९॥ अनर्थकः सन्नपि सन्नियोगः सतामनेकाभिमतस्त्रिलिंगः॥ इत्यर्थवानेव
सवेदितव्यः श्नःशानजादेशइवादिवर्णः॥५०॥ प्रस्तारभेदैरपि मृग्यमाणाः प्रज्ञामुखानामुदयो-
णानां॥ संस्कारशौचेनजहातिसभ्येहाहेस्वराणामिवसंप्रयोगः॥५१॥ उभाभ्यतिद्वीतदिमौनिरू
ढिं गतौपृथिव्यामिहवेदितव्यौ॥ दुरात्मनांसीमनिसंनिविष्टकंसः सतामानकदुंदुभिश्च॥५२॥ नन्
नमिष्टातवदेवकीति त्वयाकृतो मय्यनघोपदेशः॥ साधोः परस्यैवहितेन सख्युर्व्यापारकल्पपृ-
थलाभः॥५३॥ तज्जीवकश्लाघ्यकनीयसीभ्यः परामृशन्नेवनिवर्तितांकः॥ शोरस्त्वयाविप्रगृहा
नुदग्रान्रुशानुकेतुः प्रतिधायुनेधा॥५४॥ तन्व्येसमुच्छ्वासितशालिशीर्षांशरद्घनोवृष्टिमिवापगो
ये॥ स्वस्त्रेहतावृत्तशुचंक्षितीशः संचारयामास समाश्रयांगां॥५५॥ अतिस्त्रिणातेशुचिनागुणेभ्य
स्त्वेधदातंकुलमस्मदीयं॥ मयेकतोवृत्तमलीमसेनश्यामंयथोनेदुनिशीकरखंडं॥५६॥ मयात्वदर्थे
नकृताधहेलेभेदोनुसेर्ष्यैरसुभिः प्रणीतः॥ तदाश्रयेणाथहृदाप्रकोपंगतेहितस्त्वयिमेन्यथाभूत्॥

स्मृतः उ: शिवाय सः भू
ता: भू. मि च.

॥५७॥ स्वंजीवितंकेवलमिष्टमस्य नाहंधनेतिस्मितमुद्वहंत्या॥ कल्याणितन्मेक्षमितव्यमहो निस्त्रिंहिन-
न्नीविसहेत्वदोषा॥५८॥ भयप्रसूतेयदिसत्यमस्मिन्फलत्युन्यहन्यहंजन्मनिनिव्यपेक्षा॥ मृत्युंप्रती-
छामिवरंयथेतिभ्रातुस्तदार्यातिरिवलज्जां॥५९॥ विसर्जितोभूपतिनातलोसौ प्रतीतयासार्द्धमि-
याययध्वा॥ प्रसन्नयाचंद्रिकयाग्रहेणाग्लोः प्रत्यग्राशांतमिवस्वधामा॥६०॥ तस्यांप्रसूतंकिलग-
र्भमाद्यन्यवेदयच्चायमतीश्वराय॥ मत्वाष्टमादेवभयप्रमाणमृतीयमानः सचतमुमोच॥६१॥
तंनारदोभ्येत्यसुरार्थदर्शी प्रदिश्यसंख्यां प्रतिपूरणत्वं॥ पत्याहृतांघातयतिस्मनीचैराकर्षणं-
वानजडस्यकृष्णे॥६२॥ मुनिर्यदाख्यद्दुहितुर्देवपत्न्याः शापान्मुमुक्षन्प्रसवान्षडाद्यान्॥ नादेवकुद्भ्या
स्यभयंतमीत्येकांतमप्रीयततेनराजा॥६३॥ साध्येपरार्थेकृतिनाविधानेस्मृतापदस्यैवजनोन
वेद॥ स्वार्थस्यतात्पर्यमवेह्यमूढः प्रवर्त्ततेसाध्यमन्यथेवा॥६४॥ युग्मं॥ हतेषुगर्भेष्वथषट्सुतः
स्यायः सप्तमः प्रादुरभूदनंतः॥ तंतत्सपत्नीमपहृत्यमायास्वयंयशोदाजननायभेजे॥६५॥ ना
भूत्किमप्यत्रकिलेतितन्व्यालोकेगतोरूढिमनंतगर्भः संपाद्यसंख्यापरिवृद्धिमात्रंपरस्यशू
न्यांकइवाबभासे॥६६॥ प्रभावनिर्भासितमातृमूर्तिगर्भंतुतोनंतरमच्युतांशं॥ नृपस्यतादृष्टि
रियायतृप्तिव्यभामलक्ष्मामिवजीवलोकं॥६७॥ यथादिगेशीसवितारमीशांसांतर्वहंती प्रभयेव
मेनो॥ निजारिसंभावनयाथकंसस्तोदंपतीसंयमयांबभूव॥६८॥ सेरमदेसस्तनितेप्रहृष्टावुन्ना
रवर्षाभिनभोनिशीथे॥ जातंपितावेनमुवाहपद्भ्यांतस्यानुभावादपदेरवलाभ्यां॥६९॥ कोद्वारो
विरुवंत्यमीमुहुरिमे कारिणः कौशिकागर्जंत्यंबुधराः स्फुटन्नमइवस्फूर्जन्निवज्राणिच॥ तै
र्व्याजैरितिजर्जितोपिसनिशाधीरोव्रजद्भोकुलंमायः सत्वनिधेर्गिरिस्थलमपाराशिः पुनर्गोष्पदं॥
॥७०॥ यानंदस्यवधूरसूतसमयेतस्मिंस्तुयामाययाविद्योमोहपरायणाखिलजनेनिःसाध्वसंगोकु

॥६॥ ॥आत्मापत्यमलक्षिताभिगमनः स्थानेतदीयेकृतीन्यस्यादेशमिवन्यवर्तत पुभस्तामुद्वहन्वेश्मने
॥७४॥ प्रत्यागत्ययथापुराचरणयोरामुच्यदामायसंतुष्टावानकदुंदुभिः स्थिरमनास्तत्रैवकारागृहे॥
रथ्यातिप्रसवेजवादभिपतन्कंसोपितांदारिकांदृष्ट्वाविस्मितचेतनः सरभसंग्रा — — लेपोथयत्॥७२॥
सादेवीदिवमुत्पतंत्यसुहरस्तेन्यभजातः कविभोघायासहताशधर्तनइतिव्यक्तंतिरोधीयत॥त
द्दिव्यंभविमोहितः प्रथमजामाक्षिप्यदिव्यांगिरंनेतासानुशयंमुमोचबहुनासांत्वेनतोदंपती॥७५॥
आनंदंहृदिसंक्रमहतासभावनेनोभयोः पूर्वंविस्मृतनिर्विकारमखिलंक्षांत्यार्यताकृत्या॥भो-
जानांप्रवरः प्रविश्यसदनंगृह्णाहितोक्षितये पृष्टेमंत्रिभिरप्यधायिकदनंज्यायःशिशूनामिति
॥७६॥ ॥इतिश्रीकृपिपंडितापरनाम्नोमोहनभट्टस्यकृतावानंदांकपदसमुच्चयकंसवधेमहा-
काव्यद्वितीयः सर्गः॥२॥ ॥अथयातवतिप्रसूतयाधसुदेवेसहयोगमिद्रया॥प्रतिबोधमवापं
गोकुलंकमलानामुषसीवकाननं॥१॥निरगामिनिकेवलंव्रजेहरिमायोदितयाप्रमीलया॥अनिरू
पितपूर्वसंततेरपिनंदस्यजरोत्थयाशुचा॥२॥प्रथमंस्वतनोरपस्मृतिः शिशुलक्ष्मीहृतचित्तवसुधा
सुतजन्ममहोत्सवाभियाप्रतिपत्तिश्वरमंविपप्रथे॥३॥तनयोदयमंगलक्रियानृभिर्यावदकारि
सद्मसु॥जनितालघुतावदुत्सुकैः सुमनोभिःसुमनोभिरुद्यय॥४॥निलयेषुमहः शरीरिणांप्रमदश्चे
तसिसंभ्रमस्तनो॥शशिनीवपयोधिरुद्धतेवहुधेनुक्षणमुत्तरोत्तरं॥५॥प्रथमंपटुकांस्यसंभवोध्वनि
राधारनिरूपितोदयः॥अथसंमदनिघ्नचेतसांयुवतीनामुदियायगानजः॥६॥तदनंतरमाशुता
डितैः शतसंख्यैःसहदेवपुष्करैः॥निनदस्यभृशंगरीयसोविदधारेणभरेणपुष्करं॥७॥युग्मं॥अभि-
नेतुमियत्तयाखिलंपरिमाणंत्रिदशालयश्रियां॥निजदोहइवोद्धयंत्युरूनगृहमालाधृतपताकि
नी॥८॥अभवत्सहसैवगोकुलांधसतिंवीक्ष्यमहापताकिनीं॥तिरुणामपिविष्टश्रियांपृतनानामिव च ॥५॥

भंगलाघवं॥९॥वितताःपरितश्चकाशिरेप्रतिहारेषुविरंतराथनाः॥जनलोचनरंकुवागुराप्रतिरूपानभवो
रणस्तनः॥१०॥विरराजपृथूकृताघनैरलिभिर्विघ्नगुपांतपातिभिः॥उदिताद्विपदुरापतद्विकाशागुरु
धूमधोरणी॥११॥वसनान्यजरांसिबिभ्रतीजनतानृत्यविशेषशोभिनीः॥सकलैरभरणास्त्रिबोन्वभू
त्यवनैः कल्पतरुप्रवाकुलाः॥१२॥ हृदिनिर्हृतिरालयांतरेरभसापानुकलोकसंहतिः॥विपुलेप्यधिप
स्यगोकुहाभुभयस्मिन्नुभयीनसंममौ॥१३॥इतरेः परमंतरालयंप्रविशन्नेवनवोरितोजनः॥अपि
नामयदृष्टयाभितः परिरब्धुमपिरासुसंमतं॥१४॥ तदभिन्नमहोत्सवंनृणामधिशेषोपनमत्सुखो
दयं॥कुलमेकमिवातिसंभ्रमादखिलंगोकुलमाकुलंबभौ॥१५॥शिशुदृष्टवयस्यसंगमैः श्रियमा
कीर्णमियायगोकुलं॥नियतंनुजगत्यधातरत्नवतीर्णंजगतश्रियेहरौ॥१६॥उदयोस्यमर्त्यस्यभू
त्पितुःकुलदृष्ट्यन्वयिनामनुत्तमः॥नृजनस्यभुवीतिसंमदोविधिसृष्टाविति सर्वदेहिनां॥१७॥अथहा-
यदिवंदिदृक्षवोव्रजमेवाभ्यपतन्दिवौकसः॥क्षितिभाजिहरोपतिव्रतानतुलस्त्रीविजहोसुरालयं॥१८॥
जितकांततयारुन्धतिस्त्रियेसुभगायेविमतास्त्रियाइव॥सतिगोचितदाजनार्दनेभवने
घोरपिसस्पृहागवे॥१९॥अपिनेकतरंव्यधस्यतांव्यतिभिन्नंगुणजातिकर्मभिः॥कुलदृष्टवधूभि
रादधेविमतावारपदेषुनिश्चयः॥२०॥अथिरत्नमिवामलंक्षितिभर्तापुत्रमिमंव्यजीजनत्॥स्पृ
हयंतितरामतिस्त्रिणांतदभाग्यायदिवोपियोषितः॥२१॥नभवंत्यतिपूयमंगनाः प्रतिमानास्त्य
तिमह्यमंथतो॥दिविपूर्णशवोडुपः पुमान्परमोनूनमजायतत्वयि॥२२॥चतसृष्वपिदिक्षुनोपमान
मुसुभूः प्रसवस्यतेप्रियः॥उदकेतिनुनीवमज्जिताः सुदृशोदृग्भुविसंमदेमुना॥२३॥अपिवीरसु-
वोवकल्पतेनपरस्यास्त्वयिवद्धकस्यता॥कचिदाह्वयतेमहोजसंजननीक्रोडुरिभारिमातरं॥२४॥
रथतीप्रसवापिकाङ्क्षियाश्रियमस्योमुकुलारविंदजां॥इतिसूनृतवाग्भिरेकशः प्रमदानंदवधूम

नंदयन्॥२५॥विधिमत्यधरहृद्यान्यतारुचिरेनोचरितानितामपि॥सकलान्यपितानिसंपदोव्रजभर्तुः
सुतजातकर्मणि॥२६॥समपद्यतभूयसाविधेर्बहुदानाभिरुचिप्रवृत्तया॥अतिरिक्ततयैवकेवलंनपुन
र्न्यूनतयाव्यतिक्रमः॥२७॥अथधेनुगणाःपृथूधसःसदनद्वारिहृदंत्यनांसिव॥अतरीणिदिवस्यतेर्धना
न्युपलब्धानिनतभनार्थिभिः॥२८॥त्रितयंदयितद्विरापपद्भियपंचेषुषोपिसप्तकं॥दशकांतनथा
नइत्यभूत्परलिप्साध्यधिकंतदर्पणं॥२९॥नभसीवघनःसमुन्नतोभुवमप्तास्वपिदिक्षुवारिणा॥वसु
नाभृतगोधुगर्थिनांरुचिमुत्साहमुगध्यदर्थमुक्॥३०॥कतमन्नवसाददोपरेस्तनमस्किंयतमन्नयाचि
तः॥नन्वसाध्यसमिष्टयाचनेहितयानांददर्थिनामभूत्॥३१॥बहुशोबहुसोमपायगाबहुराभिः
पृथुशृंगमंडलैः॥यददोनिगदेषपद्भियेसुधिनेग्रामणिनेकुलायसः॥३२॥प्रतिपत्तिमिवस्वसंपदो
गणयन्कस्यचिदर्थनांकृती॥महतीमविनापचिक्षिपेसदनद्वारिवदुर्वहांधुरं॥३३॥इतिसत्फलत
र्पितप्रजोन्मुखपथान्यभितःप्रसादयन्॥विरराजसमंगलःस्वणोविमलाहाइवधारिहात्ययः॥३४॥
विरजस्कहरिंतिदक्षिणज्वलनार्चीषिसुखानिलाग्यमुं॥सुदिविस्फुरदर्यमाणिगांगतमीशं
नान्यपूजयन्॥३५॥अपिबाबदुपांशुसंविदंशिरसादाचनृपस्यसत्वगः॥पृथुकोन्मथनाभिसंधि
नाभुविचेरुस्त्रिदिवालयद्रुहः॥३६॥अथनंदसुरेसुरेश्वनस्यनदुद्विर्युजिसाधुवाहिभिः॥अधिरो
प्यगतेषुगोकुलाद्धृतदध्नाभ्यधिकांनृपोपदां॥३७॥अतिलौकिकसीमविभ्रतीनिजमायामयकृ
तिसोष्टधात्॥परिपेलधमंगरेखयासममेधाजरसंवरांशुकं॥३८॥अनुगंडतलंगतिभ्रमास्त्वप
दस्त्रद्विरघोविलंबिभिः॥अलकैःपरभागमाननेजनयंतीकमलेयथालिभिः॥३९॥अधरोषरुचानु
रंजितंशुचिमुक्ताफलचारुभूषणं॥दधतीतिलपुष्पकांतयाहृदयंनासिकयामुनेरिव॥४०॥तुलितावि
वरोभयस्तुनाहितयेनस्तनयोर्वितन्वती॥हृदिमोहमनंगराणिणांनिभृतन्यस्तविषायतेरिव॥४१॥

मदनस्यपथीहनन्विदंतनुमाभांजिपदार्पणादिति॥वयसाप्रतिपादितोदरेनवरोमावलिसंक्रमस्थितिं॥
॥४२॥भुजयोरनवस्थयामुकुःकृतलीलागमनानुकारया॥सृजतीक्रियमाणनेत्रयाहृदिपुंसांपरिवर्तनं
मथः॥४३॥प्रतिबद्धमिवाभिलग्नयाव्रजयूनांनयनोत्पलस्रजा॥अलसंजघनोरुगौरधाकथमप्युक्षि
पतीपदात्पदं॥४४॥अभितोयमणंमुखांबुजंस्मपयंतीपरितापविह्वलं॥स्मितदर्शितयारदच्छिषासु
धयेवाधरबिंबसंस्थया॥४५॥अतिमानुषलोकमाकृतेरुपलभ्यातिशयंसविस्मये॥अनिषिद्धगतिः
परेव्रजंविगतङ्कोःप्रविवेशपूतना॥४६॥दशभिःकुलकं॥ननुकात्वमसीतिसाध्वसात्समपृच्छंतनन्
यावदंगना॥प्रणयादिवतावदच्युतंसविषंपाययतेस्मसास्तनं॥४७॥व्यपदिश्यपयामिशावरीग
रलंपाययितुंप्रचक्रमे॥शकलंवपयश्चतद्यंसमतिक्रम्यपपावसूनसौ॥४८॥अथमर्मणिपीडि
तासतीविलपंतीवतमुंचमामिति॥चरमंविससर्जपूतनाहरिमादौनिजमेधजीवितं॥४९॥तदनेह
सिलंभितापुनवपुरालोचमकृत्रिमंबकी॥उपपादयतेवसृत्युनाकपटस्थात्मफलावसायिनां॥५०॥
॥सखिपूतनिकेतभात्यसौस्वकराभ्यांशिशुरेनयाहृतः॥इहभश्यतुचेयमर्भकेपूतनान्यामिवेद
त्यथाहिनां॥५१॥कुलटेतवकिंसमीहितंविधवेतिष्वपुनर्भुगम्यतां॥कनुपुत्रहतित्वमागतास्यपिपुत्रा
हिनिमुंचबालकं॥५२॥इतियादवनिष्टशंकिताःपृथगत्वधृतिमत्यनास्त्रियः॥बहिराधसयंपरासुनाव
पुषातावदपप्तदेवसा॥५३॥त्रिभिर्विशेषकं॥जननीमुमुदेहृदापुनःपरिरभ्योत्पतितैःसहासुभिः॥त
रसासमुदस्तमच्युतंभुविबालग्रहपीडितच्युतं॥५४॥सुसरथायमुपागतंगृहानुपहारंमतिपाद्य
भूभुजे॥उपचर्यसपर्यया स्वयंवसुदेवोभिदधावुदारधीः॥५५॥सुपथिभ्रखिलस्तुतेर्गुणादधरीभू
तमकुक्षिसंसतो॥तथकश्चिनारतंसुरवंपुरुषग्रामणिमित्रवर्तते॥५६॥इहयासुकृतैकसंकथाम
तिरीणीहसिसत्समागमे॥कपदेरतिरस्तिसान्नृणामतिरीणांसुरसद्मनामपि॥५७॥अनुरूपविधान
कर्तृणागुरुदेवेननथाध्यमर्जितं॥उपपाद्यजरस्यपीहतेसदपत्येनसखेसमागमं॥५८॥परिपालयिता

सिरोहिणीप्रभवमस्तुतमात्मजं यथा॥इति सत्यपि यद्विधस्तितं सुवनं तत्सुनरुक्तदूषितं॥५५॥जलदात्यजनि-
र्मलं सुनाभुवनेनाभिनवेंदुशोभिना॥अधिरोहति भूयसानुशामुदितापत्यमिदं हिनोकुलं॥६०॥दृषितस्मि दशा
धसोयथा तवविश्लेषमहं न कामये॥न तु ते न चिरस्थितिं सहे बहुरंभाहिमनोज्ञसंततिः॥६१॥अथ कंसहतं प्र
जाशुचं शमयित्वास्य शमं प्रदर्शनैः॥सुहृदोनुमतेन सानुगः स्वगृहानाथ ततो गवांपतिः॥६२॥यदुधान्वविसर्ज
नेस्यतद्वसुदेवस्य वचोनुचिंतयन्॥वितनंद्यसुपूतनावपुर्निकषागोकुलमग्रतोन्वभूत्॥६३॥दधदुज्जट
मूलसन्निभे विकटांगांगुलिनीपदोस्तले॥मरुदग्नतटद्रुमाश्रयोः पृथुसक्थ्नोर्द्वयमायतं वहत्॥६४॥अ
जलोत्तिमिरावटोपमापटुनाभीविवरं प्रकाशयत्॥युगुलेन निरूपयन्महीपरिमाणं भुजयोः प्रसारिणा
॥६५॥लघयत्यिहितान्वकीलकस्थिरखेदासहलीनवायसे॥कुचयोः स्फुटचूचुकश्रियो सुलयासंहता
सोधसानुभी॥६६॥दशनैर्व्यतिलंपिताधरैः श्रयदूर्ध्वैस्तितदार्धसंवृतैः॥उपनिम्नगधामसेवसासुषिरां-
तर्विशदंडजाकृतिं॥६७॥शयनप्रणयीतिजानतांगदशस्त्रव्यतिरेकसंस्थया॥परितः पिशिताशिभिः
खगैः कथितप्राणवियोगमाकुलैः॥६८॥इयमत्तिदृशैव बालकानिति विद्वद्भिरिवामिषाशनैः॥विहगोः
परिकुप्तलोचनैः शिरवरिप्रस्थमिवोद्धृताकरां॥६९॥आदिकुलकं॥अवलोक्यमिमित्तशंकितः शिशवेस्व
स्तिमनस्युदीरयन्॥तदिवेषसकर्तुमग्निसारचिरादेष्यति विस्तृतामिति॥७०॥नहरिः किलकेवलान
सूनपिवस्किंतु सपातकानिति॥विवचारवकीचिताभुवः कथितास्त्रोदहनस्य सोरभं॥७१॥सध्याजंम-
धुरिपवेर्पितस्तनाया मातृणांगतिमदिशत्सपूतनायाः॥नामर्षप्रकृतिकमुग्धमप्यसाधाधार्या-
णांविभयनमिष्यतेस्यहृत्ये॥७२॥हरिमातापीतोस्थितकुचमुखंजातुसुहितं वहंत्यंकप्रीत्यागुरिरिति
भुविन्यस्यविरते॥तृणावर्तोवात्याकृतिरुपनतस्तत्क्षणमसुदिधक्षुत्वाभारस्फुटितहृदयोपासुरपत
तत्॥७३॥हृदयंगमएवकेवलंनस्वजनानामपिभुद्विषामपीति॥प्रणयादिव कृष्णमस्तांगंहरिविभ्र
त्सभभोमुखःपपात्॥७४॥नष्टः कृष्णो महतीतिप्रसभैः प्रत्यापन्नैः पुनरस्योपलब्धौ॥प्राणैः प्रीतिपरमा

माहरद्भिः स्वल्पंदुःखपितराधन्वभूसां॥७५॥जातुयन्महविधौप्रतितायांमातरिस्तनपिपासुःप्रास्थत्
॥तेनयाधदकरोत्प्रपदेनव्यत्ययंविभुरनः शयनस्य॥७६॥योस्याहितेषुसकलेघनषस्थितस्यतत्वंवि-
भोरविदुषोहृदिविस्मयोभूत्॥गर्गेणसप्रशमितोवसरागतेनमिर्ध्याजरस्यमुपदर्शयतास्यवीर्यं॥७७॥
॥श्लाघ्येनस्वंतनयमृषिणारोहिणेयंवतोद्वौनंदः कर्तुमनसिचकमेनामसंस्कारभाजौ॥ततेनेष्टं
स्वयमभिहितः पिप्रियेषातिमात्रंयाञ्चाशस्त्याद्यभिमतफलप्राप्तिरानंदसीमा॥७८॥ ॥इति
श्रीकविपंडितापरनाम्नोमोहनभट्टस्यकृतावानंदांकेपदसमुच्चयेकंसवधेमहाकाव्येतृतीयः
सर्गः॥ ॥ऋषिणाकृतसंस्क्रियावपश्यद्विधिमायुष्यमिथोपपादितातो॥जनतावुबुधेनतुप्रजा
नांभवतः सृष्टिलयावितः किलेति॥१॥निरविक्षदविक्षताभिलाषः शिशुलीलामुभयोस्तयोर्ब्रजौकाः
॥ब्रजतोपिजनोदिनस्यथामान्नविदामासससुखोदधौनिमग्नः॥२॥अवगाह्यसरांसियांभजं-
तिशिशिरस्यांपिहिमाद्रिनिर्झराणांदधभूपरितांसिवेरितांशिशुखेलाचरितानिवीक्ष्यगोप्यः॥३॥
अपिनामुमुपयुद्धविलोचनानांहितयेशाम्यतिदर्शनायतद्वा॥इतितत्रसहस्रनेत्रतंभगवंतंस्तुवतां
वभूवलोकः॥४॥वपलावभितोगृहंचरंतावपशंकाबहिशस्त्रपावकेभ्यः॥तनयोप्रतिखेलरागवंतोधृ
तिरभ्यांमुदमापतुर्जनन्योः॥५॥शकिणेभुविजानुनीकषंतोप्रसरंतोमृदुहस्तपोरुषेण॥कटिकिंकिणि
कास्वनानुरागप्रसभाकृष्टमतीनतस्थुतुस्तो॥६॥बहुकालभवस्यबोधवानांधुरियुंजावधृत्य-
ध्रुवोरथस्य॥समभेवरिरिंगतुस्तदाभोकृतसंरंभतयामिथोतिपिस्तु॥७॥चरितेघधिकंमणिस्थ
लायांप्रतिबिंबानुकृतोविदिद्युतातो॥स्वपुराजनमाश्रयावतारोनिजभागानुजसंयुजाविधोभो॥
॥८॥भुवनाभिमतोविशेषकांतः सभुवोयावितकोच्युतावतारः॥इतितौप्रतिमानिभात्तरंतः स्थिति
मासाद्यविवभ्रतुःकुमारौ॥९॥निशितांघ्रिनखांशुदीर्घलेखान्यतिशिंजानसकिंकिणीकदाम्नोः॥

॥भुवि चंक्रमणानि वीक्षमाणश्चिरमेकं प्रणयं जुगूह लोकः॥११॥अथ शौरिवशोभयाविरूपैर्युजमा-
त्मानमनंतरं गृहद्भिः॥प्रियरिंगणयोस्तयोर्विनेमुपयीसंक्रियया जनेर्धरित्री॥१२॥नितरामितरेत
रस्य धालोच्यति संघर्षमवापतुर्यथोभौ॥क्रमणे घनतिक्रमात्तथैव प्रतिमाविग्रहयोरपि स्वयोस्तौ
॥१३॥उशनासगुरुर्यथा दिवेगांसबलः कामलंचकारकुक्षुः॥अधिकद्विरतोभ्यनंददेनां पुरुदं सेवप
तिर्गवीश्वराणां॥१४॥स्पणतामभजन्महानने हाशिशुलीलोत्सवदर्शिनां गुरूणां॥अथलोचनपक्ष्म-
पातकालो युगतां विभ्रितदर्शनः प्रपेदे॥१५॥धृतभूषतया सहेमकाभ्यां विचरद्भ्यां जनिताः सहेमका
भ्यां॥ग्रहिणा जहितः स्वमाधिमंतः स्वरसैकाग्रतया समाधिमंतः॥१६॥यमसूरतिरेकशः सविभ्रो
रथनंदस्य सुखं हि सूनुजन्यां॥त्रिपुतेषु तयोश्च निर्विशेषा धृतिरात्मप्रभवा श्रयाबभूव॥१७॥इदुपार्थि
मणाधिवोरुकांतीललितेदुं मुमोचिधाधभूतां॥अतिचापलसंश्रयेस्वभावादनुजं नानुचकार-
रोहिणेयः॥१८॥चरितानि शिशोर्दृशापिबंत्याबहुलं विस्मृतिरेव मातुरासीत्॥अथजानुगृहक्रियां भजं
तीमयमभ्येत्यरुरोध भूयसेनां॥१९॥श्वसितोत्थितपुण्यगंधकूलैर्मधुलिड्डिः परिवीतवक्त्रपद्मा॥चर
णोत्पलसज्जमानकुक्षागृहकृत्येभृशमाकुला सवित्री॥२०॥हृदयेषु विलोचनेषु गात्रेषु धिलावण्यगु
णेषु धल्लवीनां॥मणिवेश्मसु चोल्बणंव्रजस्य प्रसितच्छायतया स्थितन्मथत्वं॥२१॥ललितेन विडंबिता-
भिधः सन्निति लोकस्थितिनातिवैभवेन॥न सविस्मयमेकमंगनानां विदुषामप्युदपादयन्मुनीनां
॥२२॥कृपयास्मि दिवं न भोमहीं च वितयं विक्रममामनंति यस्य॥मुदितोधिजगेस्मितानने श्रीरुप
पंचानि पदानि सोगनाभ्य॥२३॥उषितं हृदि कोस्तुभेन यस्य हृयमस्थ्णोः शशिभूषणाद्युदंशू॥अनि
मेषवतीं सहस्रमग्रे मणिदीपेषु सविस्मयं बबंध॥२४॥स्वपतः श्वसितानि निःप्रसर्पंत्यपि सा-
मानि ऋचायजूंषि यस्य॥धनितासमितोमुकुः शिशिक्षे सनिपाठं पितृमातृबंधुनाम्नां॥२५॥अम

॥८॥

राः प्रतिशासतं यमर्चत्यपरांचः शिरसानितांतनीचा॥शिशुकौतुकदर्शिनां नियोगं सचकारेतदिंदिरो
दरो॥२६॥पिदधाजगतीयस्य मायागृहजालानि यथोर्णनाभजोणा वितथैरपितत्वमुक्तकामैर्जनमुह्या
मयमानमपश्यनंदसूनुं॥२७॥अधियत्रजगत्समन्मथध्रुक्सतुषाराट्सहविश्वसृट्ससम्राट्॥परिहासविरं
सगृह्यकोभूद्भयनाहारविहारविभ्रमेषु॥२८॥कुलकं॥रतिमेतियथायथैव चेतः स्वजनानामुपसेदुषामजस्रं
॥विदधेनुतथातथैव लीलामितिमायाभकतास्फुटास्यजस्रं॥२९॥त्रिपदीकृतविष्टपस्थितिस्वारकुता
भ्यासतयैव निश्रयाणां॥बहुधापतदूर्ध्वजानुगच्छन्क्रमुखेनिश्चतुरो हरिः पदानां॥३०॥हरिमंगुलिषंगजा
तधैर्यं क्रमयित्वाकतिचित्पदानि गोत्थः॥उतपंचसुषट्सुतेषभीस्यं विसृजंत्योनिपतंमन्वकृष्यन्॥३१॥
करयोस्तलमत्सरोकुमार्यं क्षतमद्यीवतिकाषजन्मसास्रक्॥इतिदोषदृशेव जानुधारं हरिरूर्ध्वमुगति
भृशंमुमोच॥३२॥दिवसे दिवसे गतेविशेषः सुपदः पादसमुद्यमेतथासीत्॥व्रजचंद्रमसोयथास्यदृ-
ष्टिर्वपुषः पर्यपुषत्कलाविशेषात्॥३३॥कलहंसकनादिनां गृहाणां हरिपादप्रसरोज्ज्वलाशयानां॥शरदा
गमदुर्दिनेतरेषां प्रतिदीप्तामिवदिद्युतेतदाश्री॥३४॥सबहुर्जिभवन्यथैकदेशे सकलान्येवकलानिबांध
वानां॥प्रभयान्यतमेपराणिसाम्यादरिदीपद्रुजसंघनांहरीपः॥३५॥क्वचिदर्भकविभ्रमेपिभेजे स्फुटतामी
शगुणोस्यतत्वभूद्भ्यः॥स्वयमप्युपसंहृतोनुभावादनपायीवसरस्वतीप्रवाहः॥३६॥श्रुतिराहभयं द्वितीय
भावे सचमायास्यनभर्तुरीश्वरासा॥इतिनूनमनूनधीरुदग्रादपिदृन्थो नभयं बभारकुक्षः॥३७॥उपमे
तिनिमीलतिभिल्लोकी भवमुन्मीलतिभाविहेतिमन्ये॥नचिरायनिमेषमाकलंबे मणिदीपादिषु जातिविस्म-
योसौ॥३८॥कृपयोवहिरेव संगिरंतं तमजं प्रश्वनदाहयोग्यभावात्॥इतिशस्त्रकृताशनेप्रकामं करमास्क
दयतिस्म भनंदसूनुः॥३९॥कालापकं॥दधदिंदुकलांसपारितव्याम्मणिनोद्भिन्नदृगंतरोनुदिग्वः॥निहतश्च
गणेननंदिनान्वरदृशोभूतपतेरिवावतारः॥४०॥सविशेषमहर्दिवं हरंतीनयनेनूतननूतनैर्दधीधा॥चरिता
निधिडंभयत्यपिश्रीरतिमर्त्येवबभूववासुदेवो॥४१॥चिताबहुजानितापिपुंसः प्रमदायानपुमंतरानुरागः॥

दयितेनृगतिंभजत्यपिश्रीर्नरलोकंकलयापिनाप्युपेतो॥४४॥कथयैवमितीहितोपिनानाचिरमुत्कौतुकचेतसा
जनेन॥पटुसाध्यगुणास्यदानिरूक्षोबहुधाचीकरतोऽक्षराणिमिथ्या॥४५॥स्थितमेत्यपतांघ्रिणंपुरस्तान्म
णिभूमौरभसाद्गृहीतुकामं॥सुखमुत्पतितोपिनोर्ध्वकक्षंतमकार्षीत्प्रतिबिंबवंचिताक्षो॥४६॥सखभूवयस्य
वनामतिर्यङ्गतिरश्वामपिपूजितःसखा॥इतिसाम्यधियेवयीतसाम्यःसखरक्षोद्भुशुनांबभारलीलाः॥४७॥
अन्वलेनमथामभंथराशिंसलिलानांकिलवत्सरक्षाभुक्षाः॥मथितुंलमलंनभोदृतीधृतमंथानमशादमुं
यशोदा॥४८॥इतरत्वनुनामधेयमात्रंयदृतंसाकिलमृत्तिकेतिरूढं॥समयंप्रतिपूजयन्निवार्षमृद्दिरागं
सरसानतीत्यभुंजे॥४९॥अलमज्जडुराग्रहंनहित्वत्पृथगात्मायमितीरितःपितृभ्यां॥उपसंहृतवान्विहा
स्यविद्वान्सहरूढेहरिरग्रजेनवादं॥४८॥परिपर्यशिषत्सरोहिणेयात्कलहेन्योन्यमितीयदंतरेणा॥उभयो
र्नविशेषमध्यगच्छन्नुपचारेषणुनापिगोपभर्तुः॥४९॥असमीक्ष्यदयापमित्यकत्वंव्रजराट्प्रेमबधंध
वासुदेवो॥सतिचात्मनिदूरगेप्यनुक्रोशकृतेनैवधृतिंबभारशोरिः॥५०॥अहितादपराभवेनसूनोःपरा
थःस्वसुखेपितानपेक्षः॥ममृषेहरिशेरावंपरेणाप्युपभोग्याधिमिवोपभुज्यमानां॥५१॥हरिभूतिकुमा
कलिभोगोधरलब्धावुपपादयन्सयोगः॥उभयोर्विविभावनर्वणोवारथिकस्यारथिनोर्वतांवनेनु॥५२॥
अविभागमपाव्युदीविरूक्षाद्रुतिरासीदपराव्यनुचिजंतो॥अमृतंकिरतःकरैःसुधांशोःकिमदृष्टविष
दिगाश्रयोविशेषः॥५३॥अनुमासमतिस्त्रियंविदुर्यपितरंविश्वसृजोनुजंमघोनः॥अपिहत्रहणंचपूष
णंचप्रवयस्कंचयुवानमर्भकंचा॥५४॥सुकथीनकदापियत्रनृणांनयनेपृच्छियथातथैवबुद्धिः॥अज
संधयस्यरूपमित्थंभजतेकालनिभंरथस्ययोर्घ्रिः॥५५॥असुकोयमहंत्वमेवमायेर्व्यपदेशैरविरूपित
प्रकारः॥शुविनाध्ययनेनमित्यवाचांविरलश्चेयसिनाप्रदेशितोयः॥५६॥मिलयोस्यकिलापदुत्यशासुर्य
दिनारायणतामभेदसोमी॥जगदंडमथाद्यमेधयस्यद्विगुणाभिःपरिवीतपृष्ठमद्भिः॥५७॥अपदिग्दधृगुछि
गादिदृग्भिःस्तुतऋत्विग्भिरपाङ्परादुदङ्दाङ्॥अमुडस्तुडपध्रुजात्मविभ्राट्सुपरिभ्राड्वपभृद्भ्रमोह

दृङ्घ॥५८॥बङ्गदोर्बङ्गपादरवन्मुहिन्मूर्गपरैस्तगगथस्वयंचतडट॥विविडेकविकीःसुपीःसुतुर्योभुवन
ग्नोमघवान्दृहन्दिविस्थृक्॥५९॥अविनट्सुविनक्षुचाधिगोमानेतिदृत्रघ्निपदेकृतप्रतिष्ठः॥ऋषिभि
स्तुतिकाम्ययार्षशब्दैरवयःश्वेतवदृत्युदीरितोयः॥६०॥जगदात्मतयेष्टतांगणेयःप्रथितःसत्सुस
खासुतीर्भुक्षाः॥यमवेक्षतपंथियंकुमार्यस्मृतिरक्षाम्युरसुक्रियश्चयस्य॥६१॥पृथगाहजनोय
मिष्टवत्याश्चतुरोष्टाविति योमतःप्रियाष्टां॥अथयकिलात्मनःप्रभेदाःकतिनेष्टाभियमेनसंभवंति
॥६२॥सदसत्परिगृह्यचांतरस्मिन्नृतियन्निगदसःसकश्चविभाक्॥अनतिस्फुटशब्दमात्रगम्यःसह
रिःस्वैरमुपेत्यबालभावं॥६३॥स्फुटगीर्षुविवक्षसज्जःपुनादृक्पदवाक्यपिपठीमृदंजिघत्सुः॥दधिमुट्
कपिशावकूटखगानांगृहयातुर्गृहचित्रमुट्करध्वाः॥६४॥अगवांचिगवांचगोविगोर्वात्यतिविस्मो
पयमानदर्शनानि॥बहुशोविविधानिचेष्टितानिप्रथयंश्चेच्छिदिदुःखपल्लवानां॥६५॥विजहारमनो
हरैकमायःप्रियसख्रीवियथातथेवयस्यैः॥ननुगोपकुलस्यतस्यसाम्यंप्रतिलभ्येतसमंकुतःपरेण
॥६६॥भयोदराभिःकुलकं॥ ॥इदमेत्यसमारहःप्रमोषीदुतमेतच्छिदृष्यदोभिदम्भा॥इतिगोकुलवा-
सिनांजनानांद्विगुणातन्मयतावभूवकृष्णे॥६७॥व्यपदिश्यगरीयसोपराधानथगोप्यःकिलजातु
गोपराज्ञ्यै॥ललितानिहरेर्मनोभिरामाव्यतिरागादनुवर्णयंबभूवुः॥६८॥अपराधसहस्रमाचरन्ने
स्तवसूनुसुभगेविरंविसोढुं॥अधुनापिनिवार्यतांयदीशःसपरेभ्योबहुमानभाजनंतो॥६९॥विजना
त्सहरन्नभीष्टमारादभियुक्तोपसरन्नदृष्टमोक्षः॥नतवैधनवामभेवभावीत्याभिधायाशुतदभ्मना
भिनत्ति॥७०॥व्रजराजपुरंध्रिसुव्रतेतेतनयोनःप्रतिवासरंदुनोति॥कपिशावकगृह्यकप्रयोगैर्दधिमु
ष्टात्यपितुंगशिक्यसंस्थां॥७१॥ननुतेकिमुदीरयामहेमातःशयनंनःसुखनिद्रयागतानां॥विकुरा
नुपगृह्यमंचपादेसहिसन्नह्यतिपश्यतोजनस्य॥७२॥उपयुक्तपयस्कशून्यमध्यंघनसांतानिकथा

डाक्टर भाऊदाजी दस्तावेजसंग्रहालय MEMORIAL

पिनद्धयभ्रूं॥सखिभाजनमंतरेणाधाम्नि पुपास्तेयमनुष्यनोभिधत्ते॥७३॥प्रविशद्भुतमस्वदीयमाने
हरिरंतर्गृहमभ्रपः प्रविश्य॥अनुतिष्ठति नैकविप्रलंभं चिरमस्मत्तनयस्वरानुकृत्या॥७४॥करभोरुस
वोरुदीस्तनूजः सदनेभ्यो बहिरेव संस्थितोनः॥अपहारयतीष्टमस्मदीयैरुपजापैर्नवशीकृतैः कु-
मारैः॥७५॥अपलायनगोचरंगतैश्चेत्तनयस्तेभृशमव्यर्थयशोदे॥जनयत्यपवर्गमात्मनोस्मत्स
हसाकीर्यदृशः परागमुष्या॥७६॥उदितोननृणाय मन्यतेस्मान्नन्वदृतंतवचिंतयत्यभीरुः॥सहिवायु
रिवैकतोनवस्थः स्फुटदोषोपिनशक्यतेग्रहीतुं॥७७॥अथजातुसहस्रयोग्रहीतः कृतशिक्षोस्य-
कपिर्हरत्यभीक्ष्णं॥सचमुंचतितत्तदायदेनंविसृजंतीः स्वदृशासमीक्षतेनः॥७८॥अतिमंदनिजप्रयो
जनार्थंबहुनाशंगृहिणामचिंतयंतं॥विवराणितनूनिकृत्ययंतंहृदयंनस्तवपश्यतीवसूनुं॥७९॥
नकश्चिन्नस्वार्थव्यसनमनुखेदोस्तितवहिमतीछामः पुत्रंविनयगुणसंपन्नमनघं॥इयंदृष्टिः सा
ध्वीयदिवगतावेतसिपरं पुरस्तात्कृतध्यंविमृशविनिवृत्तायमसू॥८०॥इतिब्रुवतिभिरुक्तेर्दुर्वि
लासेपिसूनोरभिमतगुणबुद्धिंबिभ्रतीस्नेहयोगात्॥उदधिमिवचिरस्थानंदविजृंभमाणंहृदिकथ
मपिसेहेसंवरीतुंनमाता॥८१॥ ॥इतिश्रीकविपंडितापरमनाम्नोमाहनभट्टस्यकृतावानंदांकेपद
समुच्चयेमहाकाव्येकंसवधेचतुर्थः सर्गः॥४॥इतिसुधिभक्तयः॥ ॥अथापवित्रयेतासामवंध्यप्रार्थ
नासती रहस्तनयमाहूतमाशिषत्सामभेदवित्॥१॥जानेत्वामनघंकृष्णकल्याणेवर्त्मनिस्थितां॥त
थापिबोधयाम्येवस्नेहेनापायदर्शिनी॥२॥प्राज्ञांकंसमहाभ्रष्टीरिमावितथचारिणीः॥त्वमभ्याख्या
नसीमायास्तथाद्रेचरिष्यसि॥३॥मतिंपौरस्त्रीमतिक्रम्यस्त्रैणीबुद्धिः प्रवर्ततो॥अग्नायीस्वगतंदो
षमृषिदारेषवासजत्॥४॥मायः प्रसव्यचारिण्योयवनान्यइवस्त्रियः॥आर्यः परिक्षपंतीभिः प्रकामंना
धिगच्छति॥५॥द्वेष्याइवनरक्षंतिस्नेहंयाः संस्तुतेघपि॥मत्तश्वानइवद्वारस्तासांत्याज्याः प्रयत्नतः॥१०॥

॥६॥नास्वांतातहरिष्यंतिहिमानीगिरिकंदरां॥सक्रोष्टूनिवृकोदग्माण्यरण्यानीस्थलानिया॥७॥आसुणी
क्षत्रियाण्यर्याण्यथशूद्राविवर्त्मजा॥धात्रीचिरंटीपलितासुचरिभाथवेत्वरी॥८॥सुत्वरीयज्ञपत्नीचपु
ण्येषुसहकृत्वरी॥आढ्याद्रिरिद्रतीस्निग्धारूक्षासाध्वीदुराशया॥९॥दृषाकपायीशर्वाणीमनार्वीवरुणा
न्यपि सूर्येंद्राणीतथारक्षोदैत्यपन्नगयक्षभा॥१०॥किमुद्देशेनबहुनास्त्रीजातौमेयकासकः॥त्वामेक
मंतराकृष्णभजतेशंकनीयतां॥११॥चतुर्भिः कालापकं॥मातुलान्यप्युपाध्यायान्याचार्यान्यपिनामते
॥नोपगम्यास्वयंवातप्रायोदृष्टिविषास्त्रियः॥१२॥त्वामेवतारकांकृत्वादृशासंसक्तवर्त्मया॥मोघस्वद
र्शनोत्कंठाः कर्तुमिच्छामियोषितः॥१३॥असाधुमार्गप्रवृत्तोहीमातेबुद्धिः कदापिभूत्॥तृप्तारूपस्यतेवत्स
गुणेभ्यः स्पृहयाम्यहं॥१४॥दुर्भगानामशिश्वीनांगृहान्पुष्कमागमः॥पीतोदश्चित्कतिपयेकुर्यु
स्तास्त्वयिविस्मयं॥१५॥कचित्तेमनसश्चोरीभूयान्मार्थस्ययोषितां॥एवंतेरचयिष्यामिकवराकवरी-
महं॥१६॥नास्माभिरेकराज्ञीयंवसतिस्तातगोमिनां॥बहुराजामिमांविद्धिसर्वैस्वच्छंदवृत्तिभिः॥१७॥ही
यतेकिंतदस्माकंगृहेसकलसंपदि॥गोपालिकागृहानंगयत्यर्थंपरिधावसि॥१८॥कतरस्यावराक्यास्त्वं
रसान्वेभ्यन्यवाप्स्यसि॥यान्यीत्वापुरुषोत्येतिपक्षितंकरणीजरां॥१९॥विघट्टीवीर्मणिरुचोधारयंतिगृ-
हाणिनः॥लक्ष्मीरदमुद्दीपीयादेवीचिनसाहरे॥२०॥शृंगारिकाहरेत्यूभ्यः पानोभ्यः संनिधेनवः॥किंत्वत्
प्रियमित्येतत्संपादितमजेडकं॥२१॥प्रतीक्षताबन्मधुरंघनस्निग्धामिरंदधि॥अतिदध्निरुचोसत्यापयो
शानसहानुगैः॥२२॥सर्पिःकुंडिकयासर्पिर्दधिकुंडिकयादधि॥क्षीरंचक्षीरकुंड्यांतसयूथ्येभ्यः समाहरे
॥२३॥पिशंगीरोहिणीश्येनीगौरीनीकपिलाशिति॥येचतेभिमताकृष्णतस्यारवपयः पिबा॥२४॥कस्मापी
यमजाद्यूभी प्राचीयूथस्यदृश्यतो॥उन्मुखः सहधस्तेभवमेनामेकतः पिबा॥२५॥असिताहरिणीशोणी
सारंगीसारसीकीपुरः॥एषानानेंद्रकोशस्थानैकातेशालभंजिका॥२६॥वर्तिकाकुररीक्रुंचाकपोतीचक्रसूत
का॥त्वत्प्रियार्थंचटकिकाकोकिलाचेहपालिता॥२७॥हारिद्रीकोकुमीनीलाकृष्णाश्वेताविलोहिनी॥मृद्वीच

कुभनक्रीतासाशादीतेकानुरोध्यते॥२८॥अनाहीकिंगृहभुवंक्रामेयंदिपुरोमम॥कारयिष्यामितेहेमपुपा
नयुगलंहरा॥२९॥गोपस्यास्यसदावत्सत्यजेःपरिसरस्थली॥भवितव्यंजनोदग्नपरिभ्राजकयातया॥३०॥त्रिपु
रुष्यापरिखबाहिकांड्याकुब्जयाधृता॥शतकांडाविहारार्थंतथाजीभूःप्रकल्पिता॥३१॥देवोदेवीनरोनारीकि
नर्यासहकिंनरः॥शाभिंचरोराभिचरीपन्नगःपन्नगीसरः॥३२॥ग्राहोग्राहीसस्तोमत्स्योमत्सीकूर्मीसकच्छपा
॥पर्याभ्यांसहपर्याभ्यांमकरोमकरीयुतः॥३३॥वर्तकोवर्तकाहंसोहंसीसारसलक्ष्मणौ॥तित्तिरिस्तित्तिरिरथो
चटकाचटकान्विता॥३४॥गवयीगवयःक्रोष्टीक्रोष्टाहकयुतारुकी॥करभीकरभोदंतीमनाकायहयीह
यः॥३५॥इत्थंतथविनोदायस्त्रीपुंसात्मायथायथा॥सर्गस्थाभातयःकृत्वाभूतार्थप्रतिमाश्रयाः॥३६॥पंच-
भिःकुलकं॥ मुक्तास्रजश्चतुर्दाम्नीःकाकपिंचाःपडाचिताः॥पंचाश्चामजकांदास्येयदिहास्यसिचापु-
लं॥३७॥एकांकवरपुच्छीतेदर्शयिष्यामिपक्षिणी॥मूषिकांमणिपुछीथायदिगृह्णासिशासनं॥३८॥उ
लूकपस्थांशाखायांकृत्वेव्यूहेनपार्थिवो॥श्येनपुच्छयोहकेसेनेयेतेदास्यस्थिरोभवा॥३९॥सुक्रोडासुमुखी
स्वसीसुनितंबारुरोदरी॥भवत्वाणिगृहीतीतेयदिदांतश्चरिष्यसि॥४०॥इत्थंहरंतीहृदयंसत्यासत्यैःप्र
लोभनैः॥हितमित्यन्वशात्पुत्रंजननीपुत्रवत्सला॥४१॥श्रोतानामर्थवादानांकर्तान्यार्थोपजीविनां॥
सत्येकबुद्धिरमुह्यन्मातुरुच्छापनेहरिः॥४२॥मामिकांप्रकृतिंवेत्सिदृथात्यभिशपंत्यमूः॥अनासिकाःसुरा
पीत्यःकामुक्योंतेथसायिनां॥४३॥दधिदुग्धभृतानाग्योगोणीधाद्यमृषागिरः॥दोषाणांस्वयमाधार्याः
परान्परिवदंतिच॥४४॥पणक्रीत्योपिचेद्बभवेयुःपरिचारिकाः॥अनार्यकाणामेतासांनसुधीःसन्नि
धिंव्रजेत्॥४५॥प्राकुर्यकांथकांथाचंविधमानमुखाइति॥अंजसाशुचितेचेतोमातमर्मासुधिस्त्रभत्
॥४६॥हृत्विकानिकस्याथामयाकिंनाशितंपुरा॥मिथ्याभियुंजतेपापाश्चरणाभ्यांशपेतथा॥४७॥पुरस्तो-
श्चविशेषेणमानयिष्यामितेवचः॥देहिमेभिमतानर्थान्यशोदेस्थितवाश्रवः॥४८॥इत्युक्त्वानुदरस्तस्थौशि
शुरुत्थाप्यसस्वजे॥पयःप्रस्रवणोन्मद्रस्तनाधिक्यकथातया॥४९॥एवंबहूपदिष्टापिप्रकृतिंधापलाश्रयां

नमुमोचयदाकृष्टस्तदाबुक्रोधभामिनी॥५०॥मायायाःसागतिर्दैव्याःकिंस्वित्समहिमागसां॥निसर्ग
वत्सलामेनांयदुग्नोमन्युराविशत्॥५१॥नंदस्यगृहपत्नीसाबद्धकार्याकुलासती॥अंतरप्रेक्षणीनित्यं
वहतेकेशवंप्रति॥५२॥कदाचिद्दुहसोपानमासनोलूखलादिभिः॥सोमुष्टादात्मशाखायामुच्चैःकाचास्थितं
दधि॥५३॥एतस्मिन्नंतरेतन्वीलतिकांबिभ्रतीकरे॥यशोदाभ्यापतत्तूर्णंपुत्रस्यापिभयंकरा॥५४॥ततः
सभयसीलोरुव्यस्तसंक्रमकल्पनः॥प्रपेदेस्खलितोमातुरुच्छुग्रहणीयतां॥५५॥अदृष्टोपायसन्भांगं
पारिदूषकनीनिकां॥कराभ्यांकरयोःसूनुंसंधस्यक्तलतांगृहीत्॥५६॥अथप्रस्फुरमाणोष्ठीभूयस्त्वभि
तिधाविनी॥कर्षंतीप्रसभादेनंदाम्नाबंधुंप्रचक्रमे॥५७॥द्व्यंगुलेनन्यहीनंतत्सान्येनसमधत्तचा॥संधि
हान्योनिपर्यंतमुपलेभेजनस्तदा॥५८॥दूर्यादृष्टिर्हिलोकस्यतदेकव्यवधायिनी॥द्व्यंगुलोनतयादा
म्नामितीधायेरितोजनः॥५९॥अंसस्त्रंसिशिरःक्षोमाकपोलव्याकुलालकः॥साभिव्यक्तस्तनाभू-
षास्वेदबिंदुकिताननः॥६०॥वेलद्दृष्टिगुणामर्षारागाक्रांततनूरुचिः॥श्रमार्तापृथगाभाष्यसासखीः
प्रत्यभाषत॥६१॥गंगाकेगंगकेगंगेगंगिकेतापिनर्मदे॥रेवेकावेरिकेगोदेगोदावरिसरस्वति॥६२॥स्वंस्वं
गृहमुपव्रज्यपर्यानयतदामिनीः॥यावदेनमहंबध्नाम्यासीनाःकिंकरिष्यथ॥६३॥कालापकं॥ततःकृत
नियोगाभिस्ताभिःसंपादिताशकत्॥सहस्रदाम्नीरशनानमातुरुदरंहरेः॥६४॥मध्यमाभासमाश्रंतदना
यंनवतोहरेः॥इयत्वंगगनस्येवकथंमीयेतरज्जुभिः॥६५॥अणोरणीयान्महतोमहीयानित्यद्युज्यता॥अ
सत्प्रत्ययेपिदामाभिरमितेस्योदरेश्रुतिः॥६६॥आधर्जनीश्वराणांहिस्वानुकंपैवनापरा॥इतिसूचयतानी
तस्तेनात्मारामबंधनां॥६७॥सुमुखेसुभरपेदाक्षिलोहित्यायनिदेवकी॥कारीषगंध्येभवकेभद्रबाहुसुमं
गलि॥६८॥स्वंस्वंयातगृहंभद्रानेहस्थेयंकथाचना॥मामुंचध्वममुंतावद्दुःखोयंतिष्ठतुभ्यहं॥६९॥इतिव्या
दिश्यसधीरीराभीरयुवतीःपृथक्॥निःशलाकीकृतेस्थानेभीतापेतार्भकांतरे॥७०॥अहोबहूतिभीता-

॥कंसवध॥ व्यासज्योत्स्नखलेहरिं॥विश्वध्यानंदगृहिणीससज्जेगृहकर्मसु॥७१॥कल्पापकं॥ततः स्वेदकणादिग्धींद
॥१२॥ धरानकक्रतिं॥कपन्नुलूखलमगादंतरेणार्जुनौयमौ॥७२॥इतिस्त्रीमत्ययाः॥ ॥अथकारिकाणि
तयोरूखलासंगतीआकर्षणभग्नयोः॥दृष्टशातेस्वरूपस्थौनिःशापौधनदात्मजौ॥७३॥रामोदरंप्रण
म्योभाथालस्यशिरसामही॥नारदस्यमुनेर्वाचःस्मरंतावनमस्तुतां॥७४॥आनीयःसभवानीशाविभक्तसं
प्रतिरूपतां॥शोषणज्यायसासाद्भवतीणोभुवंदिवः॥७५॥योनदर्शयतेदेवैर्नचदर्शयतेनरान्॥आत्मा
नंकेवलग्राह्यंसर्गस्थित्यंतलक्षणैः॥७६॥आत्मनाकारयित्वाऽजंब्रह्माणंकारयन्मुं॥यःकालंहारयि
त्वादोहारयत्येनमात्मनां॥७७॥वाहयत्यात्मनात्मानंयःसृष्टिप्रलयार्हतां॥प्रकृत्यानाययतियोऽव्यक्त
तांजगदंकुरां॥७८॥योवाहयतिभूतानिस्वतेवाश्वांजगद्धुरां॥लोकसंस्थांगमयतिप्रमणायःपुनर्भवां॥७९॥
शब्दंयोध्यापयत्यादौतपत्येकंप्रजापतिं॥अथयोजत्ययत्येनंपदेराम्नायलक्षणे॥८०॥शब्दायत्यति
यःस्वेनत्रिर्द्वारमयभुति॥योस्यार्थंदर्शयत्याद्यांस्तैरेवस्मारयन्मुहुः॥८१॥यःस्थापयतिलोकेशांहि
पराईभवस्थितौ॥योयज्वभिर्याजयतिइज्येःस्वांगमयैःपुरा॥८२॥सुफलंस्वादयन्सद्भिःपापैर्दुष्फ
लमादयन्॥भक्षयत्यमृतंदेवैर्यःस्वचक्रंचदत्तवान्॥८३॥आत्मानंरुंधतीकामान्कर्षतीसुकृता
न्यमून्॥पचंतीमृतंतानिसाधून्वहतियःकृपा॥८४॥अभिधाद्यतेत्यश्रीजनःस्वात्मानमर्थिनः॥ना
भिधाद्यतेयस्तंश्रीजानिःसुभृतेरपि॥८५॥योधारयतिसर्वेभ्योमुक्तिंनेष्यतिचार्थिनो॥मुनिभ्योरोचते
कामंतेभ्यएवकृतेरहः॥८६॥उज्जासत्यनार्याणांकाथयत्यमरद्विषां॥पिनष्टिदुरितानांयत्तस्मैतेह
रयेनमः॥८७॥कुलकं॥यंममंथरवरीसीरंरम्भास्तंभंचिकायथां॥तंसारंस्वहृतेमूढःसंसारदोग्धुमि
च्छति॥८८॥यानिशानानियेहर्षायेभाधास्तानिसर्वशः॥वामेवाभिन्यविक्षंतस्रोतांसीवमहार्णवं॥८९॥
सर्वस्वंदंडितोलाभंमुषितोविजितःपणां॥स्मरत्यगतिकःमायस्वामेवातइयोषधां॥९०॥वामनुत्रिदशाःस

॥१२॥

र्वेमनुष्यास्त्रिदशाननु॥उपसानितरेनूनमुपसर्वेषुतेपदं॥९१॥जनस्त्वव्यधितस्मिंस्त्वमित्यन्योन्याश्रयं
वचः॥ईशोशितव्यभावंधामपरित्यज्यवर्त्तते॥९२॥एकःपाश्चयितासित्वंयःशुभाशुभकर्मणां॥इक्षंतेगण
काःस्त्रीषुतस्मैगर्गश्चराध्यति॥९३॥इयमानास्त्रिवर्गस्यप्रार्थ्यंतेकामिभिःसुराः॥योनाश्यतेपवर्गस्य
सतुत्वामेवनाथति॥९४॥आदर्शस्तलमध्यास्तेतलंछायात्मनावतं॥एवमावसतीशत्वांजगत्त्वंतदुपो
षितः॥९५॥पर्युपरिलोकंत्वमधोधोन्यश्चराश्चरौ॥कंजंह्यध्यधिसरोदृविःपंकस्यचान्यथा॥९६॥यथमध्वानो
नुसंबद्धाःस्तमास्तेत्वत्पथंजनः॥अगच्छंस्तंसमेनास्मात्तेभ्योगत्वैतिदिग्भ्रमं॥९७॥येनाचितोभवेस्त्वा
वेयास्मरताहरः॥तंनमन्यावहेकाक्षंनष्टगालंनवाप्नुनो॥९८॥निपुणास्त्वयिदेवेषुसाधूनतिविशिष्य
ते॥अप्रधानाभिसंबंधाद्दूरंमुख्येनसंगमः॥९९॥अंतंगामाद्विधांतेभ्योदायीऋणमिवामृतं॥योसिलं
पालकःसाधून्गांगतःसपुनीहिनो॥१००॥सर्वेषुसाधोत्वयिधीःखलस्यनिजदोषजा॥यथाकेकुपि
तासस्यमध्यसाधुरसाविति॥१०१॥आयुक्तःसन्विचयनेमुक्तोप्रतिभुवस्तव॥दुःखेप्रसूतापिसु
खेदायादस्तावकेजनः॥१०२॥प्रतापमास्तेतपनःसर्गमास्तेप्रजापतिः॥यमास्तेसहस्राक्षस्त्वय्यवि
ष्णु
प्रेषुसाक्षिणि॥१०३॥यमेधापत्वदादत्तेजनोमृत्युपरिग्रहः॥सीम्नीवपुष्कलःकामेतस्मिन्नेवेषहन्यते॥१०४॥
जानानोत्वन्नियोगानांसपर्यासुतवेष्टिनो॥अप्राणेभ्योभविष्यावश्चित्तस्योपस्थियोगतो॥१०५॥
अश्लाघ्यमानोसर्वेभ्यःसंजानानोगुणेस्तव॥भरणायपरिक्रीतोभृत्योभायस्वनोभयात्॥१०६॥
सहस्रकृत्वःपर्येतियद्रथस्यचतुर्युगं॥तस्यायुःसर्वमेकाहएतावान्महिमातव॥१०७॥पत्रपुष्पोपहा
रास्त्वंधामस्वंप्रतियच्छसि॥वत्तःप्रतिवदान्योवाकोन्योयमुपास्वहो॥१०८॥सहस्रास्योपियादेवः
कस्यमारव्याप्तितेगुणान्॥तान्कालेनभितेनावामहोव्याहर्तुमुद्यतौ॥१०९॥अधस्थितोयुगशताद्वि
हस्थःशतयोजनो॥यःपश्यसिपरंतस्मैकृतीतिष्ठमहेवयं॥११०॥इत्युत्क्रांतदधातेतौप्रणिपत्यमुरद्वि

हि वो॥प्रतिशुश्रुवुषे कामानात्मने मनसः प्रियान्॥११॥तरुभंगोऽवस्तावन्निर्वातेन समः स्वनः सनिनायम
नः क्षेप्यमुत्पाश्चकितं जनं॥१२॥गव्यूतियोजनं कोशस्तदानीं योऽजाद्भुत्॥सतत्रैवाशृणोच्छब्दं महाद्रुम
निपातजं॥१३॥स्वकीयपरकीयेषु कामं सत्सु वृकघ्नपि॥आशंकेऽजारिष्टनंदस्येवार्भकं प्रति॥१४॥श्रेयः
शर्महितं तस्मै चिरं जीवितमास्त्विति॥शब्दानुसारी संभ्रांतो जनः पर्यजुनावगात्॥१५॥गतायावंतमध्वा-
नं तेतध्यानं जगाहिरे॥एकश्वासेन तावंतमीयुर्धावंत एव ते॥१६॥कथं गतगतः कृष्ण स्तोचभग्नो महानगो
वत्सायस्वस्ति भूयादित्यधावन्नंदगेहिनी॥१७॥संभ्रमाकुलनिर्घोषो घोषानंदपुरःसरः॥शालभ्रातसं
पातः पपात कुकुभिः॥१८॥यथायथं पूर्वमतानसून्मृगयतामिव॥स सन्निपातस्तुमुलस्तेषामासीदनु
द्रुतो॥१९॥हरिं चानघमासाद्य मातमाणो विसिस्मियो॥नश्रद्दधे चबालोक्तं तरुभंगस्य हेतुतां॥२०॥हरेः
कृतिं तरुभंगं यदि देवितुमिच्छया॥एतद्गृहीतवोबुद्धा मस्माभिः प्रतिपक्षतां॥२१॥पणे सारसनस्याहं मह
ध्यवहरेत्तजः॥दीव्यामि कुंडलस्याहं प्रदीव्याम्यहमूर्विकां॥२२॥इत्युच्चैर्वादसंरंभे बालानां वृद्धमा-
निनः॥वितथप्रत्ययं तथ्यं दधुस्ते गोपधीश्वराः॥२३॥तयोरर्जुनयोर्भंगः कुमारेण कथं भवेत्॥ययोर्विभि
त्साकरिणो व्यसंभाव्येति चाब्रुवन्॥२४॥कालापकं॥ ॥आनंदमापुरपरे परमं यदेकं दामोदरस्य कुशलं ब
हु मन्यमानाः॥मातानतत्प्रतिननंदतथास्यथास्य सभाविव्यपगतं तदघं शुशोच॥२५॥ ॥इति श्री
कविपंडितापरनाम्नो माहूनभट्टस्य कृतावानंदाकेपदमुकंसवधे महाकाव्ये कारकसंग्रहो नाम पंच
मः सर्गः॥ ॥हरिश्चवांछामधिवत्सचारणं व्रजाधिवृंदावनसंश्रयं वसः॥जगाम तत्कर्मसु तर्कितादुतः स
तांसकामं हि जनः प्रवृत्तयः॥१॥अथावदातांगुणसंपदं धियः सकेशजालं जरयोपपादितः॥तदोपनं-
दः प्रकृताश्रयं वचः स्वयं न्यगादीदुपनंदमीयिवान्॥२॥उपव्रजं योधिपतेराशीतिस्तथोपराजं च ज
नस्य योगुणः॥स सत्वयास्मान्भजते पदूषणं ध्रुवं नदोषमतिकिंचनत्वयि॥३॥अलभ्यभेदं चिरमुद्

रोत्कृजागृहे स्वकीये स सरचित्वया कृता॥त्वमेव भोगे धतिशय्यसे जनैर्गुणाभिभूतास्तु विकुर्वतेनते
॥४॥इति प्रदेयं परिरंभमाहिपत्सुगोधनं निष्कृपणं सबांधवं॥अतिस्पृहं दुःखलमित्यनेकधा तवप्रभाव-
स्य फलं विभज्यते॥५॥जनः सुराज्ञो विषयस्थनिर्विशान्गुणाननेकाननुपालितस्त्वया॥हितोपदेशेन
समस्त संपदस्तवात्मनाप्रत्युपयोगमिच्छति॥६॥भवत्ययं नोभिजनः किलेत्यदः प्रयोजनं कापुरुषः प्र-
तीक्षति॥अविक्लवं गच्छति देशमुत्तमः स्वसन्निधिव्याजविभूषिताश्रयः॥७॥कृषोनिमित्तेनुशयः कि-
लायतः कृतग्लहस्येकपरीवजायता॥तदादितश्चिंतयतः प्रतिक्रियां गुणानुरागादिषकामुकाः श्रि
यः॥८॥दधंति दैवेन शुभेन मोघतां चरंत्यरिष्टान्यनुकूलमेव यत्॥तदासितं सत्यपि नंदगोऽहमि
हातिथासमनसमर्थयो॥९॥उदारचंद्रोपपदोपलक्षणं यदस्तिपारेयमुनं महद्वनं॥हितं पशूनामिव
शाद्वलं तदावसामोपगिरं निरत्ययां॥१०॥तरंगवाताहतवत्सचारणश्रमोधिशय्योपनदं लतागृ-
हान्॥शिरवंडिभिस्तत्रवशीकृतेक्षणो वयः कृतार्थं हरिराचरिष्यति॥११॥वयं कलानामनुपो मा
सजं सदादधानेन समं बलेंदुना॥अलंकरोतु स्वपदेन तद्वनं वयस्यगोपालसुतान्वितो हरिः॥१२॥उदी
रितं तेनवचस्तदास्यदं चकारमध्ये मनसं मनस्विनः॥नवंध्यवाणप्रकृतेपराशये बुधः प्रणीतिं किमुतस्वयेक्षु-
या॥१३॥स्वरेण चांभोद्धरधीरनादिना जगादनंदस्मितभूषितं वचः॥प्रतिश्रुतावापदिशांदिशस्तथा चचा-
रिनेत्यगणन्निवाभितः॥१४॥मनीषयान्वग्जरसं विशुद्धयायमाश्रयंते सुहृदो हितैषिणः॥विहाय स
सूर्यकरैरिवाहतं कथं तमस्तं क्षमतेविलंघितुं॥१५॥सधातृलोकात्स्वहितं विचिन्वतां विपश्चितां ये प्रति
वर्त्ममासते तदेकमार्गप्रवणाहि संपदश्चिरं परोक्षं न भवंति तानमि॥१६॥व्रजंति तावन्महतोपि कष्ट-
तामनेकसापेक्षतयार्थसिद्धयः॥प्रसादितो स्येग्रसतोपि पाणिनेस्त्रिमुन्यहोव्याकरणं सुनिश्चितं॥
॥१७॥पुरा यथाकालमुपांशुचिंतितं तथेतिनालं प्रतिपत्तुमस्मियत्॥त्वदीययायावदभीप्सितार्थया-

गिराचतस्मिंगमितोधनिश्चयं॥१८॥जनस्यदिग्मोहनिदर्शनाकुलाश्चिरायसीरंतिहितेषिसंविदः॥अथानु
दृष्टं चरतांमहीयसांपुरोनुसंवादमसंशयाःपथि॥१९॥ऋतोर्यथाप्रत्यनुरूपवीरुधंप्रतिप्रणेयंविमलात्मनस्त
था॥अनन्यसाधारणजन्मनागुणःफलोदयेनैवपरंप्रकाशते॥२०॥शिवंयथाकांक्षयमव्यनुक्षणंतथानदा
रेषुसुतेषपुष्यपि॥ऋणादिवात्माङ्घ्रवतामनुग्रहादृशाक्यमोक्षादलमस्मिसंयतः॥२१॥उपाहितैरध्यनसंभरैरि
तस्तदद्यवृंदावनमाशुगम्यतां॥इयंव्रजश्रीरपिलोभितेक्षणासरोंतरंपुष्करिणीवगच्छतु॥२२॥स्रुतीरभिव्याप्य
तयोःसनिश्चयस्तमाकुमारंव्रजमभ्यनंदयत्॥गुणैर्धनस्योत्सुकमेवविश्रुतैश्चिरंतवासप्रणयोपिनारुध
त्॥२३॥अथेप्सिताकारणशब्दसंकुलःप्रकीर्णसामिप्रकृताक्रियान्तरः॥यथाधिकारप्रतिपादितानुगः प्रवृ
त्तमार्गक्षमवेषकल्पनः॥२४॥अयास्क्रियातत्परलोहकारकःस्वकार्यपर्याकुलरज्जुसर्जकः॥प्रयोजनापे
क्षितदारुभाजनक्रियासमासंजितकाष्ठतक्षकः॥२५॥असंकरश्रेणिकृतेष्टगोगणःप्रवीणसंपादितपा
त्रवाहनः॥पुनर्दृढोपस्क्रियमाणधोरणःशनैरुपाजेकृतधुर्यपुंगवः॥२६॥स्फुरत्पशुभाजनगीरनोधुराने
युक्तजातोक्षमहोक्षतक्षिकः॥विनीतदृढोक्षमयोपकल्पितस्त्र्यपत्यसंचारणयोग्यवाहनः॥२७॥अतोयप
क्वाभ्यधिकान्नसाधनःसमस्यमानाकुलसर्वभाजनः॥असारभारापगमार्थतंडुलाक्रियोपयुक्तातपशुष्क
शालिकः॥२८॥विरुद्धदिग्मेलकरुद्धसंचरःपरीक्षितैकार्थविवादनिर्भरः॥अनध्वनेयार्थवशारीकृतप्रदा
नसंभावितदीनलालसः॥२९॥शिशुव्यपेक्षारचितोदवीवधःकुमारसंप्रार्थितबांधवत्वरः॥द्रुतांतिकादागत
वचनंवचस्विनः सामन्योथसमन्युधिक्कवः॥ तदुपस्थितमात्मनोभयंवचसोदीरयितुं प्रचक्रमे॥७३॥ स-
कलंजगतिक्रियाफलंधीरेरुद्धकसाध्यमिष्यते॥ कालस्यखलु प्रधानतास्थानस्यापिगुणान्करोत्यधः॥
७४॥ अल्पांतरितेप्यतिक्रमेवेयुष्टाभिमतोप्तिकर्मणः॥ द्विगुणाकरणादिसंस्क्रियानक्षेत्रस्यतथोपयु
ज्यते॥७५॥ यस्योपशयोनचिंतितः प्राग्रूपावसरेविपश्चिता॥ अथतस्यगदस्यकालिकीसंप्राप्तिर्नसुखा
विकिल्पितुं॥७६॥ तदियंसमयातिपातजाशुगवस्कंदतिमांडुरत्यया॥ हृदादनुपायतांव्रजत्यनुतापोहिव-
लीयसामपि॥७७॥ देवीवचसोपलक्षितोविदितःशक्तिगुणादकृत्रिमात्॥ हरिरस्मदुपेक्षयाचिराद्यतीं
द्विमगाद्यथामयः॥७८॥ असुरोन्मथनेषुदेवताप्रतिपत्यानवकल्पितौजसा॥ गिरिमुद्धरतास्मिबोधितः शी
र्षण्येधिवगृह्णतामुना॥७९॥ विपदंगवतामिहध्रुवंननिमित्तस्यबलंव्यपेक्षते॥ आश्चर्यमसारसंहतेर्वि-
श्लेषात्स्थितिरेवयाचती॥८०॥ नचहर्तुमहार्यमुच्चकैरवरस्तादलमीश्वराज्जनः॥ हरताचमहाबलंत
तोधैर्यंहारितमच्युतेनमे॥८१॥ अपुरःप्रतिकारदर्शनान्मनसःक्षोभमुपस्थितंममा॥ संहर्तुममात्यनोत्सहे-
प्रतिनिंबस्यगभस्तिमानिव॥८२॥ इतितस्यवचोनिशम्यप्रत्याश्वासयितुं प्रचक्रमे॥ कर्तुंक्षयतः प्रसन्नधी
रभिषक्पाशइवश्रुताधिकः॥८३॥ विमताभिमतंमहीपतेनिरुपायंभुवनेनकिंचना॥ कृतबुद्धितयाकरोतिचे
दयकार्मफलतोनहीयते॥८४॥ इहवस्तुषुबारमार्थिकीनबृहत्काणुकतास्वरूपतः॥ अणुकर्त्यमपीष्यते
बृहन्निपुणैर्यत्फलतोतिगृह्यते॥८५॥ उपसंक्रियतेज्वरादयः सहदेवीजटयाशिरस्तया॥ विषशांतिपरिग्रहे

यसीषभोर्दंतनिपातितोषधिः॥८६॥प्रतिकाङ्किकशोर्पकंसिकंमूलंवाडुषिकः कलाक्रमात्॥शतकैः परिवर्द्ध्य
त्यहोतदुपायस्यनिदर्शनंमतः॥८७॥गर्भंतिवशंक्रियावतांहरिदर्वीकरकुंजरादयः॥परमोपिपुमानलक्षणोग्रह
णीयः कृतिनामुपक्रमे॥८८॥अवलोक्यगृहीतनिष्कलांभिषगव्याहृतशास्त्रदर्शनः॥गृह्णातिपुनर्हिकंनि
कंविगतालस्यमनाकुलः क्रियां॥८९॥परिषद्बलकिंनसाधनंभवतोभ्रातृबलस्यदृश्यते॥नहिशत्रुबलोसिके
नविद्राजन्किंनिरुपाय्यमस्तितः॥९०॥अथधानसमीक्ष्यतेत्वयाशक्तीकाग्रियशक्तिरात्मनः॥हरिणायदु
दीरितेगिरोपरमस्तेहृदिवीरविस्मयः॥९१॥कोडोपरथीयपार्थसोदकयानुगतास्वदाज्ञया॥कुर्युःपरिक
र्तनंभुवस्तवसात्वःप्रथमाःपदातयः॥९२॥अपिपश्यसिकिंनहस्तिनंकुवलयशेखरमंजनोपमं॥मल्लान
थवांध्रमुष्टिकप्रभृतीनप्रतियोधविक्रमान्॥९३॥एषामुपमोत्तराहिनप्रतिमातीश्वरदक्षिणाहिवा॥जा
नोहिबहुत्रतेपुरानहरिस्तान्प्रतरीतुमर्हति॥९४॥समयाकुरुतावदेषतेभविताकार्मुकपूजनोत्सवः॥
त्याधिकृतेनसभ्रजंश्चाफल्केनहरितेदाहृया॥९५॥बलिनांभुजयुद्धकौतुके सतिसामूहिकरागसंभृते॥
मल्लोसहरोहिणीसुतंहरिमाधिंस्तवसोहरिष्यतः॥९६॥षाडुण्यपरंपरीणप्रकृतिमशस्यकंशासनोद्धतला
॥ज्योतिष्मतिकस्यचारुकीर्तिविडुषितराभजतेतुकेवलश्रीः॥९७॥इत्यंतद्वचनस्थिरीकृतमनाःस्वांगानि
पश्यन्शनैर्भूयोप्यात्मनिसभ्रशीयसितरांसंभावनामाद्धो॥स्थादप्रियवाग्विषेधृतरुचिर्यः कर्णजाह
गतेतंमृत्युर्विवरप्रहाररसिकः सानंदमुद्दीक्षते॥९८॥ ॥इतिश्रीमहाराजदवीसिंहाज्ञानुवर्तिनः कविप
ह्रितापरनाम्नोमोहनभट्टस्यकृतौपदसमुच्चयेकंसवधेमहाकाव्येआनंदांकेतद्वितसंग्रहोनामदशमः स
र्गः॥१०॥७॥ ॥अथतिदुर्विभक्तयः॥ ॥भावेनभावोधनिनादोयथानुकूलेनरसोरसेन आधाहितीय
नतथानुविद्धोबभूवरुक्मस्यवयोविभागः॥१॥उरोभुजस्कंधकपोलवर्तीगुणप्रकर्षोनिपुणाधिगम्यः॥हरेः श

MEMORIAL

रीरेनवयौवनस्यप्रवृत्तिमाद्यामशनैः शशंस॥२॥मनोरथैर्यावचिरमुत्सुकाभिः संकल्पितोगोकुलकामिनीभिः॥
तामप्यतिक्रम्यविशेषरम्याहररभूत्सावसरेवयःश्रीः॥३॥रागानुविद्धस्वचरित्रदोषप्रछादनव्याजतयोपयुक्तं
॥मनःप्रविश्यापिहरेर्मनोजः कृत्स्नावधूतंनवकांक्षबाल्यं॥४॥वयस्थरूपंदृदृशुस्तरुण्यः शेषाजनः शैशवमेव
तस्याः॥सभावभेदोर्थपरायणस्यमायेवमायामनुजस्यमन्ये॥५॥पूर्वंयथातस्यकुमारिकाभिः स्कंधोपगूढ
शिशुविभ्रमाभ्यः॥तथातदानीमपितान्यभूवन्गुणप्रधानत्वविपर्ययेण॥६॥आवण्यमुद्दीक्ष्यहरेस्तदोदाय
थास्वमिष्टोपयमानशोवन॥संभावयंत्यस्तुवरंतमेकंशेषाश्चिरादाश्वसिषुः कुमार्यः॥७॥रामोदरस्तुल्यगुणो
वरोस्याइतिश्रुतेर्बंधुमतेकदाचित्॥राधास्मरस्यापिरसानभिज्ञाहरोक्रियावल्लरधीरमूहो॥८॥सतीषुसंतानगु
णोज्ज्वलासुबद्धीषुगोपालकुलांगनासु॥स्वयोर्यशोदादृषभानुवध्वोर्विशेषतः संवृतभिमानः॥९॥तयोनसं
बंधमपीहमानेनाभ्यर्थ्यतेस्मपरस्परेण॥स्वापत्यसौभाग्यमदाद्भजंत्यावाशास्यगौरवमात्मवृत्तिः॥१०॥प्रमि
द्धनेपथ्यविशेषकांत्योः प्रयुक्तयोर्दर्पणदर्शनाय॥राश्वयशोदादृषभानुजायाहरेश्चयोगंसदृशंददर्श
॥११॥प्रसंगलब्धप्रसरंमनोस्यांहरेर्दृढप्रेमभविष्यतीति॥तत्साहचर्यादपहर्तुमेछन्मातापिराधांनविनयशी
लां॥१२॥यदुन्निमीलद्भजकन्यकानारुक्मेनपाणिग्रहणेभिलाषः॥मुग्धासुलाधत्स्वरसेनलोलस्तेनेधरू
पेणविवेशकामः॥१३॥स्वमेवरुक्मंपतिमीहमानागोपस्यकन्यानिभृतंनिमित्तेः॥सौंदर्यशोभागुणतारत
म्यंस्वस्येतरासांचजगानपृच्छत्॥१४॥आयुष्मतीगोर्यसितोहरिस्तत्कायोग्यतेत्यास्थितनर्मवारीक्षणांतनेकाविडु
पेत्यधात्रीकृतोत्तरीयेस्वरुचिंविवव्रे॥१५॥तस्यात्मसंबंधमनात्मनिष्ठंतथाविधंकामममर्षयंतीः॥मनोविनो
दायपरावितेनेस्वयंसखीरुक्मविवाहलीलां॥१६॥कपोकराभ्यामवलंब्यसख्याः पृष्ठंगतामानयदुन्मुखाक्षी
स्वस्यानुरुक्मंगणमेत्रमन्यापरप्रयुक्तेस्मदविप्रदिष्टां॥१७॥स्वयंवराचारसमाश्रयत्वाद्भीमनलोदाहकथां
प्रतीतां॥शुश्राव काचित्स्वयमीरितेभ्यः स्पृहावतीदृद्वधूजनेभ्यः॥१८॥आसीत्परीहासविवाहकर्मण्येकावधूर

न्यतरा च रुष्टा॥ गृहांततोंतर्मदिरायतास्थां परावरस्यामकरोद्सूयां॥१९॥ पांचालिकां काचनदर्शयंतीवधूस्त
वासाध्वितिरुष्टमूचे॥ पृष्टा च नामस्वमुदीरयंती मंदं ललज्जेन्यधिकं जहर्ष॥२०॥ तेशीविभागद्वयतुल्यसंधौ व-
योंतराले मृगलोचनानां॥ अंतः प्ररूढोपि न कामहंसश्चिरं बहिर्निःपतितुं शशाक॥२१॥ आशारदानां जननादिस
र्व्यात्कर्तुं दशामार्जवपरीक्ष्यं॥ अंतः प्रविष्टोपि कुमारिकाणां नेतावदभ्युत्सहते स्म हंतेस्म कामः॥२२॥ उभासुचे
तो गहनेषु तासामव्यक्तलिंगो यदनंगधन्वी॥ तन्नूनमाकारजितो मुरारेरमुं प्रहारं मृगयांबभूव॥२३॥ व्याजै-
र्मिथः स्पर्शसुखं भजंतीर्हरिश्च पूर्वश्च कुमारिकाणां॥ आस्तां जनस्तो मदनं दधाते परस्परस्यानुपलक्ष्यरेखं
॥२४॥ कुमारिकास्वप्रसरस्तदानीं हरौ हिलंतीर्युवतीः सिषेवे॥ अभिन्नकोशासु मृणालिनीषु कुमुद्वतीर्भृंगइ-
वासमेषु॥२५॥ तासां मुकुंदे प्रणयानुबंधात्तदेवसांगत्वमियाय कामः॥ कीर्तेस्तु हेतुर्व्यभिचारिणीत्वादसू
तभेदात्तमितिप्रसिद्धिः॥२६॥ लक्ष्यंतदालंघयितुं वपूंषि प्रपाजितानां प्रथमेनुभावः॥ प्राभिधातादपवर्तमानाभं-
गादवापांनचिरस्यशंकुः॥२७॥ अन्योन्यरागं तु मुरारिरारेः पयोधराभ्यां भृशमुन्नताभ्यां॥ उद्वाहितं तावदुदीर्यवक्षः
पर्युत्सुकाः स्वांगलतामभंजन्॥२८॥ आचुंबितुं पूर्णकपोलमास्यं गोप्योहरेः पूर्वमकामयंत॥ समुद्भितोध्यश्र
निरासुरंगात्स्वजः परागं मुखमारुतेन॥२९॥ अंतर्गतं भावमिवोपहर्तुं पुरोदिदृक्षंतं हरिं मृगाक्ष्यः॥ स्वाचीकृता
भ्यां च विलोचनाभ्यां शनैर्ध्यलोकंत सकर्णरूपांते॥३०॥ क्वाडेषु कर्णे किलकंबुकंठ्यस्तत्रोदकंठंत हरिं विलालाः॥
भुजोप्रसार्यानमितांगकाथाविवर्त्तयंति स्म निजांघ्रिभूषां॥३१॥ असंस्थितार्थाभिरपि क्रियाभिस्तासाम-
मोदिष्टभृशं मुकुंदः॥ तथाहि भावाधिगतो प्रियस्य यथारतिर्नास्तितथोपचारः॥३२॥ वीतान्यसंघट्टतयाप्यभीक्ष्ण-
रुष्टस्ययोगेव्रजसुंदरीभिः॥ अन्योन्यवैपश्यनिरासनिर्व्यासहाभिलेषे प्रथमोपभोगः॥३३॥ आद्ये परीहास-
विधौ शशंके वक्ष्यामहे मूनितियाभिरुक्तः॥ तूष्णीकतां च प्रतिमृग्यतासामुद्वेलमागात्प्रसरं मुकुंदः॥३४॥ उत्था
पितेरेव निमित्तजातैः सनिक्रमेण प्रतिभागुणेन॥ दृष्टिं विधायस्वजनस्य सेर्ष्यां बालाश्चलंतं हरिं सदेशे॥३५॥

गोप्योहरन्वेत्रविषाणवंशंहारांगुलीयादिहरिर्जहारा॥ रुत्वाकथोद्दातमिमं पुरस्तात्पर्यंचिरे विभ्रमनाटका
नि॥३६॥ अभिन्नभावैररहस्यबाह्यैर्हरिर्वयस्यैः सहितः कदाचित्॥ कुंभैः शिरस्थैर्भृकालशेयैर्यातीवनांतं वनि
तारुरोध॥३७॥ पृष्टः स्वयं ताभिरथो निमित्तं समाददेवाक्यमसंभ्रमेण॥ दूरं नशंकध्वमशंक्यमार्यादत्वेह
नोयास्यथ मार्गशुल्कं॥३८॥ नमन्महेशुल्कपदाभिधेयं पर्यायतस्तत्प्रथमं प्रचक्ष्वे॥ ननर्मशीलेत्वयि नो-
स्तिशुद्धिर्वदेरमिथ्येतिसताभिरुक्तो॥३९॥ प्रत्याबभाषे सचराजभागं पण्यात्प्रदेयं किलशुल्कमाहुः॥ उदश्वि
तोविक्रयिकाः स्थराजा मार्गस्यचास्मीत्युपरुध्यतिष्ठे॥४०॥ नमर्ममात्रेणरतिर्मदीया सत्येन सासत्यम-
हं ब्रवीमि॥ प्रतीथमांवास्वमनोनुरूपं ---तथैवास्मिकृतं विमत्या॥४१॥ अथैंगितज्ञाः स्मितपूर्वमूचुर्भूषे
युधावालिशवद्वतेदो॥ नंदस्यपुत्रेत्वयिराजशब्दो न युज्यतेगूढमृतेनिमित्तं॥४२॥ रुष्टोप्यविभ्रन्मुखरागरं
ध्रुरुद्यादप्रतिभातबुद्धिः॥ येनास्तिराजाशृणुयात्तन्मे बालानिमित्तं यदिनश्रुतंवः॥४३॥ गोप्यः पुरायूय
मिवाधुनान्यागध्यानिविक्रेतुमितः प्रचेरुः॥ पश्यन्नपुंसीश्चकमे सकामश्चिरोषितः कश्चिदिहेवयक्षः॥४४॥
असौजहारैकतमामकामांसीतादृशग्नीवदवप्रसह्य॥ विक्रोषतीनामनवेक्षितस्याश्चंद्रावलीवाललिताथ
वेति॥४५॥ अथानयंतं प्रतरीतुकामाकामातुरं सेनमवोचतार्याः॥ विद्वेषतावत्स्वयमंगनानां प्रपंचवत्तां प्रतिभा
गुणस्य॥४६॥ अतीत्यसर्वामयितेनुरागः सैषास्मितेहस्तगताकिमंगा॥ भवेयमेकानुसुखीषुधाच्याप्रयथातथा
त्वामनुमंतुमीहे॥४७॥ समानयिष्यन्दयितामभीक्ष्णस्तावंतिरूपाणिविधायमायी॥ तयासखीभिश्चसहे
वकेवलं कृतीतृतीयं पुरुषार्थमांछत्॥४८॥ परस्परामाहृतमेनमर्थं विवेदकश्चिन्नमदंतरेण विपक्षदोषेग-
णिनामभिन्नेहिकर्णतुल्यं हिगणेपिगोप्यं॥४९॥ तावेरनिर्यातनयार्थवत्यः प्राबोधयन्नुद्धतभूधरमां॥ प्र-
धर्षणामर्षरजोमृजायांहेतुर्न चावद्दमुखः किलेति॥५०॥ इदं प्रसंगाद्वयतीघवोचं नान्यप्रगृह्यं यथतन्मदर्थे
खलोहिबभ्रातिरतिंपरस्थेर्षाच्चेः सतांतेषु निजप्रतीतिः॥५१॥ ततो मयाघानिसपापयस्तो मांवित्तधर्मांति

गशासितारो॥ताभिः कृतप्रार्थितमिर्हताभिर्नृपः कृतोहं पथि शुल्कदानिः॥५२॥गतिं न पूर्वां चरितां जहीतताभिर्य
थाकारितथाकुरुध्वं॥स्त्रैणोस्मि राजन्निति विश्रुतोहं शुल्केन युष्माभिरपि प्रतीच्यः॥५३॥इत्युक्तमात्राः प्रथमं भि
थस्तामुरवपिधायाऽहसिपुस्तरुण्यः॥ततोजगादैकतमामुकुंदः संभाव्यतेतत्त्वयि दुर्विपाकः॥५४॥धर्मातिगानाम
सिशासितावेत्कस्माद्धर्मेण रतिं दृणीषे॥वाङ्कर्मणातेन समान्यथाहि बालाः किमर्थं विजनेरुणाल्सि॥५५॥श-
ठोसि नूनं क्रियया नुमेयस्त्वयासयश्चोनहतः परार्थी॥स्वार्थप्रवृत्तोसि यदात्मनैव वनेतदादेशइवास्थितोभूः
॥५६॥यक्षाभिभूतामहयांबभूथ स्त्वां प्राप्तकामाइति किं ततोनः॥इतोहृतार्थासुतवद्धशुल्कं सतीषु वानाभिभ-
वायकश्चित्॥५७॥पृथङ्नृसौभाग्यमदावलेपाच्छुल्कं यदन्विष्यसि सुंदरीभ्यः॥कानामनामानि यदोपदाभि
भवंतमावर्जयितुं सकामाः॥५८॥कामं हरेसा धुरसीति कामादभीप्सितं तेनतिलंघ्य मासीत्॥शुल्काभिधाने
नतु जातरोषानाशास्महे तेतनुदानमात्रात्॥५९॥शुल्कस्य हेतोरधुनोपरुंधे वक्तापुरः किंनुभवान्नविप्रः॥इति
स्थितेहानिविपर्ययेपि दानेनतेनप्रसरंददामः॥६०॥हरिः सखीन्प्रेक्ष्य परिण्यगादीदिमानदास्यंतिविमुंचते
ति॥यत्स्यंत्यदस्त्वेहकिमुन्मनास्त्वं जातोसि कृष्णेतिवतेरवाहि॥६१॥प्रत्यभ्यधुस्ताश्चरुषेतमन्येशुल्कंहरिष्य-
ध्वइदंहिहरो॥यद्यूयमुग्धाइतिनोवयंतज्जानीमहे सर्वमपीगितंवा॥६२॥किंवापरान्पृच्छसि साध्वसाधुज्ञा-
त्वापिगोविंदसमीहितेषु॥येषांहिनेताभवसित्वमेषांबुद्धिर्नबुद्धिर्भवतोतिशेते॥६३॥मोहर्तिकंनर्मविभाति
तिसर्वंतत्तावदस्मांस्महिमुंचमार्गं॥प्रवर्त्तसेचेदतिलंघ्यमात्रामापत्स्यसेसंग्रहणाभियोगं॥६४॥संख्यो
भवामस्तवचेतयस्वमासर्वतः स्वार्थपरायणोभूः॥किंव्योमपश्यस्ववलोकयेतः सख्यंप्रमाणंनहिशोकि
कानां॥६५॥एष्यंतिनः कृष्णतवांतिकस्थाविनानिमित्तादपिनित्यमार्याः॥यामोष्यतीतोवतसन्निधौतेशंका
महेकश्चिदुपेष्यतीति॥६६॥त्वयाधिसृष्टाविसृजंतिनास्मानिमेनुगास्तेयदिहंतशाधि॥नातिक्रमिष्यंतिव
चस्तवामी दास्यापितेस्यामननुप्रसीद॥६७॥विस्रष्टुमर्हस्यगृहीतदानामस्यामहेमानदमात्मनस्त्वां

एवंपुरातेद्विगुणंचदत्तोवक्तासियश्चान्यदुपभुतंतत्॥६९॥इत्युन्मनस्काः प्रसमीक्ष्य गोपीरारोपयंतीरपि
रेयबुद्धिं॥यानाभ्यपेतंचकरिष्यथेतिहसन्वयस्यैर्विससर्जकृष्णः॥७०॥ततश्चजीवेतिविलोकयंत्याभ्रश्यत्क
रार्थीइवसानुतापः॥ययुःपरैः संवृतहंसलीलंगालोडयंत्योहरिजल्पितानि॥७१॥कथाभिरेवोषितमात्मभावं
व्यानंजकृष्णस्तनुमध्यमाश्च॥परस्परांगव्यतिषंगशून्यं मनोभवंनिर्विविशुर्द्वयेपि॥७२॥तावच्चिरस्यप्रथमं
नियुक्तैर्यथार्हवर्णैर्यमुनाधतारः॥आवेष्टिकृष्णायकुमारिकाणामंभोविहाराकुलमानसानां॥७३॥आगामि
भृंगाइवपुष्पवल्लीहंसागमात्पुष्करिणीरिवप्राक्॥स्मरेणसाशंकमिवेक्ष्यमाणाहरात्कुमारीर्हरिरालुलो
के॥७४॥हरादवस्थाप्यसपारिषद्यान्नद्यास्तटांतेषु निवेशितानि॥संहृत्यवासांसिविलासिनीनामुत्तुंगमेक
स्तरुमारुरोह॥७५॥भुजप्रतारस्समलाघवानांरागादनुत्तानविगाहभाजां॥उन्मज्जनप्रेक्ष्यशरीरभासांता-
सांमुकुंदोललितान्यदर्शत्॥७६॥सेकाक्षमाकूणितलोचनानामाकंठमग्नावयवच्छवीनां॥तासांमुखेशोव
लकल्पकेशैरुत्पन्नभूभः समपादिसिंधोः॥७७॥मुकुंदतरंगैः स्वभुजप्रमाणैराक्रांतमंदोच्चभुजांतराणां॥
साक्षात्सविश्वात्मतयेवहरादासाद्यामासनवोपभोगं॥७८॥अंभोविहाराकुलचेतसस्तानस्तेनमज्जा-
सिषुरंशुकानां॥उत्तीर्यतोयाद्यथविस्मयिन्यः प्रेक्षंततंलक्षणगम्यमेव॥७९॥रागोत्तरामर्षभरादभीमभ्रूभं
गरम्येर्वदनारविंदैः॥भूयोनरंभस्त्रपयाप्रविष्टाबभाविरे कृष्णमनोहरस्त्र्यः॥८०॥नर्मक्षमाभिः सहनर्मकु
र्वंस्तथाविधत्वंनवयंप्रजामः॥मागाः क्षमिष्यंतइतिप्रमादं क्षांतोसिपूर्वं चलघोनिमित्तं॥८१॥आशाजहा
युस्त्वजनोंबराणिशोभिष्यसेनातिविरूढवेषः॥किंवाहसस्त्वस्तिनतेन्यशंकाकोपात्किमप्येतिबहिर्मुखा
न्नः॥८२॥कृष्णकस्त्वन्नरव्यतकिंनिमित्तंकोपंकुरुध्वेस्मिनवाब्यकर्मा॥जनार्दनस्येवजनाजरंतोजानंति
मेजन्मजगद्विभूत्यै॥८३॥मा प्राणिनामीक्षणनामधेयामृगाः समागत्यपुरोपजेपुः॥कुमारिकाणांवसना
निमुष्णन्वामयास्मानमृतंशुचीति॥८४॥सोहंप्रवृत्तोस्मिपरोपकारेतन्नाभ्यसूयिष्यथमेकुमार्यः॥हिम

॥ युतेर्द्वैधितयोयथावायूयंचनाभाथविधीयमानाः॥८५॥ बुध्यामहेवाविविशारदंतांसच्चाटुहार्योऽपरण
वलोकः॥ अहीहिधासांसिनचेत्सुतेनहास्यामहेमातरमग्नजंवा॥८६॥ इतिब्रुवाणासुकुमारिकासुक्षिप्तेक्ष
णोरिक्षुहरिर्जजापा॥ माकृध्वमेतानिदरंशुकानियथास्वमाद्दमितोभ्युपेता॥८७॥ अनायतिप्राप्तविनिर्ग
मास्ताः परस्परंप्रेक्ष्यसमंसरित्तः॥ अथाद्भुतस्वेनिर्यथुरग्रहस्तैरोर्णाविधुः स्वर्णरुचः कटीरान्॥८८॥ तारेजु
रुच्चैर्जघनापिधानव्यग्रायताभिर्भुजवल्लरीभिः॥ पूर्णायमानस्तनसंनिवेशाकेशैरुपस्तीर्णनितंबपा
र्श्वाः॥८९॥ तनीयसीमंगलतामपिस्वांभुजाधिकांतस्थुषतीरिवामूः॥ रमेहरिः प्रेक्ष्यसमाकुचंतीः प्रसा
ध्यमानाइवलज्जयेवा॥९०॥ अपत्रपांतामपिसुंदरीणांममर्षलब्धप्रसरोनरुद्धः॥ नमेतमामंजलिभिः
शिरस्थैरितिस्वलाभ्वाकुरुतस्फुटोरूः॥९१॥ तास्वंशुकस्तेयवशंवादासुस्वंतत्सदाक्ष्यंगणयांबभूवा॥ हरि-
श्चिराधर्जितसर्वभावंप्रमेधतासांनविदांचकारा॥९२॥ अद्यापिदेहीतिशिरोगताग्रैर्हस्तद्वयैर्दर्शितसन्न-
तिभ्यः॥ ताभ्यः सवासांसिददोदधानः स्वयंस्वदुर्वृत्तइवानुतापी॥९३॥ रुद्धः परामृशदसाधुकृतव्यलीकंव
त्स्यंतिमांप्रतिकथंसुदृशःपुरेति॥ तासांतुमन्मथयगुरुप्रतिपादितानांकांतप्रसादमतिरस्थरजंजकेलि॥९४॥
कांतस्यनर्मणिसधर्षणरागरम्यसंमिश्रमेकमपरेणपुरोजजृंभे॥ पश्चादपासरदमर्षरजोमुहूर्तादा-
नंदवारिममृजेवनितापगानां॥९५॥ ॥ इतिश्रीमहाराजदेवीसिंहाज्ञानुवर्तिनः कविपंडितापरनाम्नो-
मोहनभट्टस्यकृतौपदसमुच्चयेकंसवधेमहाकाव्येआनंदाकेगोपिकापरिहासोनामैकादशः सर्गः॥॥
मुग्धानजानंतियथानृशंसस्तीक्ष्णैःशरैर्विध्यतिपुष्पधन्वा॥ इत्यच्युतग्राहितवाग्गृहीतोहास्यायकीर-
श्चक्रुपेंगनानां॥१॥ निष्क्रांततारेरितलोचनानांभ्रूभंगभाजांसहसोपरोधे॥ प्रसन्नगंभीरगिरामिवांतर्भा-
वस्तदाग्राहिचिरंवधूनां॥२॥ सर्वात्मनांतर्गतभावमस्मैदत्वापिमुग्धाःस्वयमच्युताय॥ ध्यानंजुरीषच्चपलेक्षणा
यथाजेनगूढांगविभूषणानि॥३॥ बालाबबंधुर्भृकुटीमसाम्यादामोदरस्योपनिमंत्रणेषु॥ विलासिनस्तस्यपु

॥३०॥

नर्नताक्षंतस्युर्बलात्कारकचग्रहेषु॥४॥ इतीमुकुंदस्यदृगेवहासः प्रलोभनंस्वैरकयोपचारः॥ अन्योन्यमी-
र्ष्यैवविलासिनीनामाप्तोपदेशप्रतिमाधवस्तैः॥५॥ मत्स्यध्वजंचक्षुरिषूनकटाक्षाधनुर्लतांभ्रूर्यदुपाश्रिमी
ता॥ अतः प्रकामंमदनोपितस्मिन्नंतर्बभूवाखिलसाधनेस्त्रैः॥६॥ निबद्धसंज्ञापरिभाषमादावल्पश्रुताध्या
हृतशेषभावां॥ सामान्यलोकप्रतिपत्तिबाह्यांतेकल्पयामासुरनंगसूत्रां॥७॥ हावैःस्मराचार्यनवोपदिष्टैर्हरेजा
यंतविशेषकांताः॥ तत्काभिनीभिस्त्रिदशांगनाभिर्गोप्यस्तदेवाभिनिवेशितांशाः॥८॥ अनन्यपूर्वेष्वपिसंग
मेषुप्रायःप्रियाव्यानशिरेनमानां॥ आधेरुपनूनंरतिमासुभागैःस्मरोर्थदर्शीहरिमाविवेश॥९॥ संकेतवेणुध्व
नयत्यभीष्टेविलंध्यतास्तत्वरिरेगभूषां॥ आधेरुपस्कंदयितुंक्षमाणामाहार्यमात्रेषुहिनव्यपेक्षा॥१०॥ अशक्त
वंत्याभरणानिबालास्ताश्चिरेगेपुनराबध्नंति॥ कालेर्पितेरप्युपयांत्यभिज्ञारहस्यभेदेमुखरैर्नयोगं॥११॥
संकेतवेलात्ययशंकिनीभिर्यद्विस्मृतंदूत्युपजापकाले॥ नवागताभिप्रियसामवादेषस्पर्शनंतत्क्षणमन्व
बंधि॥१२॥ तावद्विधैरेवहरिःस्वरूपैःसंकेतसंस्थास्वबलासुरेमे॥ छायागतेरिंदुरिवात्मबिंबैर्भिन्नप्रदेशा-
सुकुमहतीषु॥१३॥ अपिप्रभावेणरहीभवेयुःस्थानानिरुद्धस्यजनाश्रितानि॥ शंकोत्तरस्तेयरतस्यरागा-
द्रुवव्यवेपीत्सतदंतराणि॥१४॥ मनुष्यसंचारविवर्जितानिप्रतापरुद्धाहितसंभवानि॥ महाभयोद्रग्नत
राणिदध्योसंकेतलीलाभवनानिरुद्धः॥१५॥ आद्वारकस्थंविभयांबभूवुर्गोप्योपिसांद्रेतमसिप्रजंत्यः
धृत्वापुनश्चक्रभिरेवनांतेगृहांतभागोपवनप्रतीत्या॥१६॥ गुरुप्रदिष्टान्यरुजन्वधूनांकार्याणिमध्ये
गृहसंभवानि॥ संकेतशालागमलानुकूल्याद्बाह्यान्यरोचंतविलासिनीभ्यः॥१७॥ रुद्धाभिसारप्रणयेन
तासांरुद्धेषुवेषेषुमनःसमज्जा॥ इतीवनामूरनुतेपिरेस्वंसतीयशःश्यामिकयोपरक्तां॥१८॥ कामं-
क्षणेघोपयिकेषुसर्वाःपृथक्सनेकात्मतयान्वयासीत्॥ रुद्धावकाशास्तुतदंतरेतेशेषाभिराशंक्यहतं
विषेदुः॥१९॥ मानोपदेशानवधूययासांरहोमुकुंदंसुदृशोभिसस्रुः॥ ताभ्योभिलेषुर्विदितंनिजाभ्यस्तेना

पितंपल्लवभंगरागं॥२०॥कदाचिदाख्यास्खलितापराधेसराधयाक्षिप्यतमानवत्या॥अथोन्मनस्कः कुशलेन
सख्याश्रीदामनाम्नाचरुपेवनांते॥२१॥ततोवनादेत्यवनांतरंसमैक्षिष्टगोवर्द्धनमद्रिराजं॥आपुष्पितोदग्र
शिरस्तरूणाव्याजाद्भुजत्राणयशोदधानं॥२२॥निःशापयस्तेश्वरपुत्रभावात्तामसिद्धपूर्वाकृतिवीयमीशं॥कांता
प्रियार्थाध्युषिताद्रिराडिवाधरकश्चिदुपाससर्प॥२३॥नामस्वभावेवहिरण्यमालीव्यानम्रमूर्द्धाध्वनि
पूर्वयाथी॥विहारशीलोविषयेषभिज्ञःसवर्णयामासगिरेःस्वरूपं॥२४॥सरोनुवभ्रातिकुलान्यलीनामुत्सा
रसंतीरमृणालिनीषु॥वहंत्यपोभूमिषुचांत्रनित्यमुत्सारसंतीरमृणालिनीषु॥२५॥गंभीरमूलोद्दरणास्पद
स्तुभुजोद्भुयाद्भवत्वदुद्गनालः॥एषोन्वभाद्च्युतनाभिपद्मंस्वयाभजेकार्णवदृश्यशेषं॥२६॥श्रीयामिहा
पामसिताश्मवीथीं नवाहृतामासनयामुनीनां॥तांपुण्यताप्येतिभवत्पदांकांनवाहृतामासनयामुनीनां॥
॥२७॥परस्परस्थेवतुलामिदानीमारोहतोहोग्रिषुविष्टपेषु॥स्वयानुमौलिस्वयमीरितात्माशैलोयमिंदुश्चमहे
श्वरेण॥२८॥शिखाभिरस्मिन्वमुद्गसानावगाहितारोदयिताडयंतो॥हंसानजन्मक्षितयेस्यचापोऽवगा
हितोवोदयितांडयंतो॥२९॥माहेंद्रमन्युप्रलयप्रसूतावेकार्णवेस्वोद्दरणावटांते॥अनेनकुक्षौपरमेष्ठिनेवगो
पंजगद्बीजमिवन्यधायि॥३०॥अस्यानिलस्कंधलिहांतटानांसमानताऽधीरवनावलीनां॥आस्तेसुरद्वंद्व
मुखेर्भलिन्याःसमानताधीरवनावलीनां॥३१॥नकांडकल्पांतभवांबुराशावेकोद्धितोयंगिरिरन्वभावि
हनूमतःसागरलंघिनोर्थेमैनाकमुन्मग्नमिवानुकुर्वन्॥३२॥द्विजाःसुरद्वंद्वमुदेत्रयांतिस्वनांछतारामल
ताकुलायाः॥द्विर्वादवोयंनिशिरत्नमालास्वनांछतारामलताकुलायाः॥३३॥भवानमर्षादमुमात्मभूर्द्ध्वा
संवर्तकांभोधरकोपमेषः॥चराचराणामधुनामतीतोतन्वाल्पयासारगुरूकिलद्वौ॥३४॥हरेःसमान्यान्
घनमालिनोमुद्रकिलस्मीलतिकानलोकः॥तान्पातिदेशानिहशुग्विविश्वमुद्रकिलस्मीलतिकानलोकः॥३५॥

उत्स्थायपश्चात्प्रतिरोपितस्वादश्लिष्टपूर्वस्वनिवेशसंधिः॥विनेवबाचायमुद्गसानुबाहोर्बलंवर्णयति
स्वकीयं॥३६॥कामानिनीकांतरतायमानंवनेनसाधूनयतीहतेना॥यःप्रांगिरस्तोप्यरतिंगुणोरावनेन
साधूनयतीहतेना॥३७॥संवर्तभारक्षममस्यसारंनूनंधाताप्यपुराबुबोध॥येनाचलानांसमताधिरा
जाहिमालयोराज्यविभागकाले॥३८॥कालेसुराणांमिथुनानिनास्मिन्नपाप्तताप्योरसतानवेन॥मत्तद्वि
जोपेनवियोतिसर्वंनपाप्तताप्योरसतानवेन॥३९॥कृत्वापरस्मिन्नपिगोत्रराज्यंविश्वस्यभूतिंप्रतिजा
गरोद्वौ॥स्थितोभुवोभारसहःसनागोलयाभ्रकालेयमनेकमूर्धा॥४०॥स्तुभ्यास्यनीचैःसवितानयंति
तिर्यक्करास्तेसवितानयंति॥खाईतथारामपितानयंतिस्त्रीमन्मथंविक्षुवितानयंति॥४१॥शेषेनकेला
शइवोपरिष्टान्नकेवलंसंपुपुवेयमद्रिः॥किंतुत्वदीयेनपदार्पणेनमूलप्रदेशोपिकराडुतस्तो॥४२॥अस्मिन्न
लभ्रंपरिरभ्यसिद्धाःसमानमंतर्नसमानमंतः॥आश्चर्यदृश्येकलहांतराणामुदारमंतेनमुदारमंतो॥४३॥
नारायणस्येत्यभुजावलंबंप्राक्क्षीरराशिःकिलमंदरेण॥तवाधुनानेनविनीतसारःपोरंदरःकीर्तिव-
योममंथो॥४४॥कुटंतिदृष्ट्यावयवैःपुटंतिस्फुटंतिहास्यैर्नरसाहुटंति॥मुटंतिलज्जानमुदश्चुटंतिचुटं-
तिहारैःप्रणयानुटंति॥४५॥इतिप्रियेषुस्मरजैर्विलासैस्सुरंगमुख्योद्रिमभुंभजंत्य॥भुव्यावनोद्देशगु
णेषुभूयःकैलासभूतेरपिनाधियंति॥४६॥कांतानकांतानतिमंतरेणसामान्यसामान्यगिरांचरंतु॥
कामेनकामेनकयासमेयान्मानोपमानोपनताद्रिरस्मिन्॥४७॥आपक्षयामासकिलाग्नसख्यामेकः
शरण्येधयमद्रिराजः॥इंद्रप्रकोपाकुलगोकुलार्थंयःस्थानमात्मीयमशेषमोजत्॥४८॥मुनिप्रजाःकं
दरसानुरोधःश्रितोर्थधर्मकंदरसानुरोधः॥धृतेभ्रनानातपसाधनेनमुक्तातपानातपसाधनेन॥४९॥सं
क्रादभीमामविषह्यवेगांगंगांपिनाकीवदिवःपतंतीं॥युगांतकालोचितमेघदृष्टिंचस्कंभमूर्ध्वायमभं
गुरेण॥५०॥मलिनोकुलेविहरतामलिनामधुनातनेनसुमनोमधुना॥परमावनद्रिरमदोपरमातरसात्र

तस्तपतिरास्तरसा॥५१॥शृंगाग्रस्थगितदिधःपयोदवीथीपर्यंतमेखलापदस्य भूगर्भप्रतिमगुहस्यवि-
धतेस्यत्रैलोक्यंजठरगतंयथेश्वरस्य॥५२॥पततामनंगसरसः सरसस्तटमाश्रितः सतरुणास्तरुणः॥इ
हदृश्यतिध्वनिकरोनिकरोयमिनांतपोमदमयंदमयन्॥५३॥गत्वास्यराजतनितंबशिलाभिरेवंधनिःशेष-
दृष्टिविशदाःपवनानुलग्नाः॥विंदंतिशृंगनिपतत्सलिलावरोधःश्यामाःपुनर्जलधराःपरभागवर्त्ता॥५४॥इदंग
तरुणारुणाश्मभृगुणागुणायुतवतावतारबहुना॥अनेनगिरिणारिणातिसुमनोमनोविसृमरामरालय
रतिं॥५५॥हंसाःकुर्वंतिसरसीषुसपंकजासुभृंगावनेषुनवगंधजुषःकवंतो॥ऊर्ध्वानिनास्यमणिसानुषु-
चारिधारापर्याकुलेषुकुवतेदिविचातकाली॥५६॥उच्छ्वासभेपरिधिनिरुद्धाशांतेशांतेशाद्रिप्रभृतिविशे
षादृश्या॥दृश्यास्तंभाविषमिलिताधाकाशेतेद्वौकनकगिरिश्चायंचा॥५७॥खिद्यतेत्वगिहाद्वनानिलशीते
नश्रुतिःकलपतत्रिणिखिंतो॥रत्नदीधितिमयेनिमिषंतीदृष्टिरेवपरिखिंदतिपुंसां॥५८॥सप्रियांगल-
गनाददरिद्रोनोरतिःसरवगनाददरिद्रो॥अत्रशांतविरहारमणीनांजातुचिद्रुचिरहारमणीनां॥५९॥इह
सुरवनितारतोत्कंठितप्रियचपलकरापनीतांशुकाः॥वसंतइवभुवंलिखंत्योरुजःकषणविमलरत्न-
कीर्णलिषः॥६०॥स्वरेणाक्षीजन्येनिभृतमधुरेणाथविहगैरिहामाद्यन्नाक्षाः शिखरमवनिस्तारमणि
तैः॥स्वरेणाक्षीजन्येस्मरविधिमयेग्नेनियमिनोनसर्तारःश्रोत्रैप्रसृतरतिनिस्तारमणितैः॥६१॥किरण
प्रसर्पणविशेषदुर्ग्रहामणयोग्रहेशरुचिविष्फुरल्लिषः॥अभिदृष्टनिर्मलकशांबुदांतरैःस्फुटलक्ष-
णाइहलुभंतिलोचनो॥६२॥दिग्येपरतापरतासिद्धाध्युषितेत्रधीर्वभसदानसदा॥नवतत्परतापरताव
निलेनभस्यथंहिनसदानसदा॥६३॥आमूलचूडनिचितौषधिरत्नजालैरर्कावसानसमुदीर्णशिखाप्र
रोहैः॥लोकत्रयोपकृतिकल्पितदीपवृक्षप्रेक्ष्याकृतिर्ज्वलतिनक्तमहीध्रः॥६४॥इहसुसत्फलपुष्पपरंप

॥३२॥

रंथनलमस्तरजःपवनंवनं॥भुजगसंधिचरन्नकुलंनियमिनांतपसामहतेहते॥६५॥नहचलत्यपिनद्यवरश्मैः
स्थगितसमस्तभरानवपतेस्थ इयमचलवरस्यसाधुनोधोरुपरिमहीवफणास्यनागभर्तुः॥६६॥सरसाल
सोरभमुसंरसाःजरागविहताभरसा॥गमितोयथास्वरपिरागमितोगमितोत्थनेछतिवियोगमितः॥
॥६७॥क्रांत्वोर्वीखंदिवमपिसतामूलमध्याग्रशृंगैरेकीभूतंत्रिभुवनमिदंकामतेनक्रुद्धं॥संगंव्यस्ताधि
करणमिवानोतिनाधेयजातंरुद्धान्योन्यस्पृहमधिगुणैःस्वैरवष्टब्धदेशैः॥६८॥तेनेत्थंमीरितधिशेषगु-
णोमुरारेःक्रांतोप्यभीष्णमचलोनवतांततानो॥येषांविभूतिषुपराधिगतांततानसारंहितेप्यवसृजं
तियथावगाहं॥६९॥अथनतमभिनंद्यतंविसृज्यप्रभुरगमद्गिरिमात्मनाद्वितीयः षडृतुसहितमेनमन्वसा
दिन्नहिकृतिनोऽवसरेघतीतकृत्याः॥७०॥नारीणांनववयसागिरावमुग्धान्मोत्सुक्यंमनसिजवारुणा
नयंतौ॥आनंदंदशमभितोरुचानयंतौतौसाक्षाद्दिवमधुमाधवावभूतां॥७१॥ ॥इतिश्रीमहाराजदे
वासिंहाज्ञानुवर्तिनःपंडितापरनाम्नोमोहनभट्टस्यकृतौपदसमुच्चयेकंसवधेमहाकाव्येआनंदांक-
द्वादशःसर्गः॥ ॥अथकलध्वनिमत्विकलक्ष्मणामृशममादिभृतांबुजसंपदा॥क्षितिरुहांकुसु-
मोदयवत्तयासमधुनामधुनासकलंजगत्॥१॥अभिलषन्निवनिःप्रतिशासनंजगदपेतगतिःशमवर्ति
षुतिपतिर्मलयानिलकर्षणासमुधुनान्मधुनान्यरसंमनः॥२॥कुसुमितैःसहकारमहीरुहैःसुरभिगंधि-
भिराकुलितंवनं॥प्रणयिनीजनमानपरिग्रहंसमधुनोन्मधुनोन्मदकोकिलं॥३॥अपिदशानपुरास्मयकर्क
शाःप्रणयिनांप्रणिपातमपूपुजन्॥अनुशयादनुसस्मरुरंगनास्तमधुनामधुनाशितसंहतिः॥४॥मृगद
शामनिमित्तरुषामपिप्रियतमांकसमर्पितचेतसां॥परभृताविरुतैर्मणितस्पृहाजननदोननदोग्न्यम
ममर्षजां॥५॥चलमृतुःस्वमशेषमजीगणत्परिगतोपवनातपवारणे॥सरसिनूतनतामरसोदयेहिजस
माजसमागमशोभिनि॥६॥रतिरुचिंविकचाम्बरुचाचिरंवपयतेस्मवधूसहचारिणा॥वनगतस्मरध

क्रिविकस्यभान्मधुरसाधुरसावितरान्प्रति॥७॥सहचरानचिरेणसुमध्यमाः कुसुमगंधमदाद्विधूर्णता
॥वनविहारपरिश्रमवारिणोऽवपुषावपुषावलवेविरे॥८॥नशशिरापगमः शिशिरादयंतुहिनसंग्रहमेक
मदुद्रवत्॥मृगदृशामपिमानजडीकृतंननुमनोऽनुमनोजमदिद्रवत्॥९॥अनुनयंदयितस्यविलासिनीश्र
वणलब्धसमाधिरुपासुचा॥सुरभिकांतपतत्रिसमीरितामचकलञ्चकलञ्चुरितांगिरं॥१०॥परभृताविरु
तैर्निरधग्रहंमधुजयंमधुदूतमहीरुहाः॥कुसुमसायकतूणविडंबनप्रभुवनेभुवनेऽलमशिश्रियन्॥११॥
अलमिवप्रसवैरभुरागिणोदृशिरस्फुटकंटकविभ्रमाः॥तरुणशाल्मलयः सुरभिश्रियास्मरवशा
रथशालिवयोगिरः॥१२॥अनुदिवंन्यधुर्धीन्मलयानिलः पटधिकासिधनुः पटजंरजः॥ध्रुवमपेतधनुर्ध
हमायुधंतदतनोदतनोरिवधन्विनः॥१३॥कुसुमसायकशस्त्रनिशानजंरजइवाम्रवणप्रभधंरजः॥वि
चकरेपरितः पृथिवीतलंमलयजालयजातनभस्वता॥१४॥मदनहव्यवहंयददीदिपन्मलयदिङ्मरुदु
त्रकिमद्भुतं॥यदुतधूलिकदंबकमैधतंहरितदादितदार्पिकुतूहलं॥१५॥रतिरहस्यतदिग्वनितामुखेवि
किरतामिवसोमनसंरजः॥विटपकंपभृतामवनीरुहांसमरुतामरुतालसपत्रिणा॥१६॥प्रयततेनपरैः
प्रतियोगिभिः सहसुजातिरुदीरयितुंगुणान्॥इतिऋतौविचकासनमालतीविकुसुमाकुसुमाकरना
मनि॥१७॥मदनदंडपतेरिवसूचयद्विजयिनश्चतुरंगबलोद्यमं॥भृशमभाययदध्वगकामिनीरविधू
रिवधूलिकदंबकं॥१८॥कुसुमचापगडायुधशोभिनीर्निरवपन्गृहपुष्पमहीरुहाः॥रतिपुमानभृताम
सितभ्रुवांसुमनसोमनसोव्यधकारिणीः॥१९॥भ्रमरमंगलगीतिमनोहरंरतिपतेः प्रतिबोधमुपेय्य
तः निरवधर्तदिवार्तवमुच्चकैरतिनिशांतिनिशांतमनेहसं॥२०॥शशिरुहापितपत्रपरिच्छदंनधनमेवम
हेऽइवाश्रयः॥मदनमछदयत्कुसुमाकरोमदमितंदमितंहरवह्निभा॥२१॥पृथुतरंरतिरागमपश्यन्वि
कसितस्मितचारुवधूलताः॥मदभगंधवहेनयुधालिनामधनतावनताण्डवहेतुना॥२२॥कुसुमबाणसृग

DEHALI DAUI
MEMORIAL

ध्वनिदर्शनेनिभृतवासगृहादविनिर्गमं॥प्रणयिनः शिशिरापगमेस्फुटन्नवनवेवनवेवनितांजनः
॥२३॥हिमवतोपिविलीनयतिस्मयंसुहिनसंग्रहणंशिशिरात्ययः॥नवकुतस्यविलापयतोरुषंधृतिमि
तस्तिमितस्यवधूकुटः॥२४॥व्यदृदरत्करुजैरिवकेसरीयुवतिमानगजंरुधिरारुणैः॥ऋतुरनेहजगच्चकु
तूहलंगुरुचिरंरुचिरंनवकिंशुकैः॥२५॥ ॥इतिवसंतवर्णनं॥ ॥रतिपतिर्मधुनासहचारिणासहचि
रंविहरन्समसिद्धयता॥दिनरुधान्यषदहनसंपदासहितपाहितपाहितपाकरसालया॥२६॥मधुल
ताविरहेणमधुश्रतामनसिजाधिभरंयमशिश्रियन्॥अथदलत्कुसुमानवपाटलातमधुवन्मधु
वन्ध्यमबिभ्रती॥२७॥अपिनिदाघऋतुर्जगतीतलेविरसमेवविधातुमशिश्रियत्॥नवशिरीष
सुगंधिनिकाननेनरतिमारतिमानयतिस्मस॥२८॥यमनुभान्यवधूजनमर्थिनोविरहकातरम
ध्वगतिंययुः॥अथवनेमृदुवायुनिनिध्यसच्चलकुचंलकुचंतमसस्मरत्॥२९॥पुनरधिज्यमिषाप
गतेविधोविघटितभ्रमरालिगुणंधनुः॥अकृतमंजरिभिर्मदनाय्यः सककुभः ककुभः समभूषयत्॥३०॥सुवदनारतिरोषमजारयन्नजरयन्नमनः सुमनोभवं॥प्रणयिभिर्ललितानिसहापुषभुज
लगतालगताशकुलेत्वचा॥३१॥मृगयवोऽरजवंतमरीचिकामनुमृगान्कलगीतिभिरुन्मुखैः विर
हिणस्त्वलयः सुदृशांसुधाभ्रमधरामधराग्ररुचिंतदा॥३२॥शयनकृत्यलसन्नलिनच्छदानिबुलकुं
मिथना जविलासगृहानदीः॥सुकृतिनांन्यनुभेजिरेश्रमहरामहरातपरोधनात्॥३३॥मधुलिहंछलतोनवम
ल्लिकास्मितवतीसुमनोभिरजूहवत्॥परिणतेप्रियचाहृदयेश्वरंप्रियतमायतमानपरिग्रहं॥३४॥
॥इतिग्रीष्मवर्णनं॥ ॥अथऋतुस्त्रिदशायुधलक्षणोजगदुदंबुदजालमबिभ्रजत्॥दलितवत्सा
कारकोरकसंपदोगुरुतयारुतयालिपतत्रिभिः॥३५॥अभिनवोत्थपयोधरसंभृताजनितपाल्लवि
कालिमहोत्सवा॥कुसुमहासवतीगणिकादृशामतनुताऽतनुतापहरंरसं॥३६॥सललितंहलिकांत

पलाशिनांनवपराभरेणबिसर्पता॥ दिगबलावदनानिसदागतिव्यलिपतालियताकिनिकानने॥
॥३७॥ असितकांतिघनेरितचंचलाविलसिताकुलमीलितलोचना॥ रतिगुरुंहृदिकापरिषस्वजेनत
रसांतरसांद्रधृतिःसती॥३८॥ अपिवदेवनिदाघवतीमहीप्रथममंबुभृताभिवर्षिणी॥ अनुपदं
ससृजुःपथिकांगनानयनतोयनतोन्नतपूरणा॥३९॥ अलमजागरिषुजलदागमेस्मरकलासुनराः
सहिकेवलं॥ अतिपुराणपुमांसमुपासनापरमथारमयातमसूषुपत्॥४०॥ दहतसितिगंधमजि
घ्रपन्समुदयंरजसःसमतिक्षिपन्॥ शुचिरुतंपरितापमपीपिडन्भवहितावहितानवहृष्यः
॥४१॥ ध्वनिमपिस्वपदात्मपरायणंद्विजमपीष्यदमीमिलदातपं॥ अचिरदीप्तिमपुस्फरदंबुदो
वसुमतोऽसुमतोपरमेर्थियत्॥४२॥ नभसिशादयिताघनविप्रुषामनसिशातयितारमणीरु
षां॥ मरुदभूत्रावदाशुमदंकृतस्मरतरारतरागमशिश्चयत्॥४३॥ नयनवर्त्तिजनस्यकुलूहलंस
मधसायथतिस्मनभाल्ती अलिपरंपरयाकुसुमस्थयास्मरवतोरवतोलितवीणया॥४४॥ प्रि
यरतोभवितायभपत्रपागुरुवरोरुजनामयिमत्सरी॥ इतिकिलोदमिमीलदहृदंघनतमानत
मानृतुरभ्रवान्॥४५॥ अपरजोंकुरितोन्मदबर्हिणासमरदंभदनंगमुरायुधं॥ गलितमानतपापतिस्त्रि
योवसुमतीसुमतीरकरोदृतौ॥४६॥ प्रसवितव्यदलक्रकचानभोमरुदधापयदाशुससंकेतकाः॥ विर
हिणोमदनस्यधृतिक्षिरोविहतमोहतमोहृतयोजगत्॥४७॥ ॥इतिवर्षावर्णनं॥ ॥विशदचंद्रि
कहर्म्यरतार्य॥ नरपतेर्नरशक्तिरिवोजसाशमितमार्गविरोधिसमुद्भया॥ दिनकरेणविशोषितकर्दमा
शरदुदारदुदारमरीचिना॥४८॥ ज्वलितशुक्रजदाहविकित्सयाजगतिलापयतेस्मयथाघनः॥ अथत
थासपनोध्यतयानृणांरतिमतांतिमतांशरदाहरत्॥४९॥ द्विजकुलाश्रयशारिनिपातनीपरमदृद्धिमन

परमदृद्धिमनेषतवारिदाः॥ अहरदभ्युदितःसमुनर्नदीःशकलशःकरुशःसमसूतयं॥५०॥ स्मरण
शरन्यमुखाव्यपचक्रमुःशरदिदुःसहमप्रसहिष्णवः प्रसवगंधमयंमदसौरभंघुनगजानगजाःसम
पर्णजां॥५१॥ सितगरुद्दशनानिसरिद्धूपुलिनकांतिपदानिविहृण्वता॥ घनमयंऋतुनातिभिरेहृते
हृतिमोदितमोहमयंस्मरः॥५२॥ गगनचुंबिपयोधरकूटवान्गृहपथंसहसाऋतुरोर्णुवीत्॥ तमथविध्य
मिधोदयवान्ऋषिःपरहितारहितावरणोस्तभत्॥५३॥ ॥इतिशरद्वर्णनं॥ ॥विशदचंद्रिकहर्म्यरता
बलामुखगुणाभिभवानिवशोचति॥ ऋतुरभाविलतांशरदोविधोतुहिनदोऽहिनदोकसिलक्ष्मणः॥५४॥
सफलदृद्गुणांकिलहेमनंप्रणयिनांगणराश्रमचीकृपत्॥ युवतिहृद्मकृक्रिमविभ्रमैर्मदितरोदितरो
षितहासितां॥५५॥ अनवधीरयवामिवसंमतःश्रमहरःश्रितभीरुकुलोषणां॥ हिमऋताधनिलोहिमशी
करंवदितरोदितरोषइवासिचत्॥५६॥ दहनमस्फुटधूमलतंनिजंघनरुचोकथयन्निवपांडवः॥ सदृशा
मेणदृशामरतिस्पृशांहिमहतामहताविरहाधिनां॥५७॥ उदमनायतपुष्पलिहांगणोमृदितपद्मवनेन
हिभर्तुना॥ तमथनप्रसवैरसभाजयन्कलिनीकलिनीकृतजन्मभिः॥५८॥ ॥इतिहेमंतः॥ ॥स्मर
विभूतिकरःस्फुटभूमिकाजटिलपत्रमुखःसमरीधरत् कलिकयानवकुंदजयाकलाशशिशिरः
शिशिरःशिवलक्षणां॥५९॥ मणमत्सरभाजदधाधरंकिसलयव्यपदेशमपुस्फुरत्॥ स्पृशतिकुंदलताः
सुमनोलिहामसनवासनवाभिरतोकुले ६०॥ रतिपरिश्रमखेदनिवारणंयुवतयोलघुयावदवेक्षिषुः
स्पृशुपेत्यसशेत्यमृतुर्मतःस्मरविभोरविभोगसहातपः॥६१॥ ॥इतिशिशिरः॥ ॥थलोकिसम
धुर्थधूजनरुषांसदाम्प्रदयितानवर्द्धितरुजः॥ नयभ्रविगगाःस्वनैर्विरहिणांसदाम्प्रदयितानवर्द्धित
रुजः॥६२॥ नमधुस्थितिंकुसुमसंपदालतासहकारजोभिरमिताळिलिंगतां॥ कलिकासमुद्भमकृतो
र्थशेषयस्सहकारजोऽभिरमिताळिलिंगतां॥६३॥ उदधृतरमणीकुनिमानामधुरनवांचि[illegible]

मनानि॥निभृतरतिपदान्यनेष्वपसुर्मधुरनवांऽवितताल्कानानानि॥६४॥॥वसंतः॥ ॥श्रुविदिवसनदीषुघ
र्मबाधानवरतमिन्नतमालकानानानि॥अजनिषतलटानिकामिनीभिर्नवरतमिन्नतमालकानानानि॥
॥६५॥प्रसवेनशिरीषजेनमाघन्नलिनीरावहतेनकोमलेन॥अथकामिजनोन्मसारिरंसुर्नलिनीसवहते
नकोमलेन॥६६॥ ॥इतिग्रीष्मः॥ ॥सवितरपियदग्नसन्निपातानतुविषसादकरोदिवस्तरीता॥ज
ग—दपिसघनोवियोगिनीनांनतुविषसादकरोदिवस्तरीता॥६७॥औत्सुक्यघनतिभिरेषुनीयमानाः
केकाभिःप्रमदमयूरसंगताभिः॥नोकंठग्रहणमयंमनस्विनीभिःकेकाभिःप्रमदमयूरसंगताभिः॥६८॥
॥ ॥इतिवर्षाः॥ । शरदंगनाभिनवमौक्तिकावलीसरसामरालरुचिरायताऽलिभिः॥नलिनेघन-
श्चिचलितेषुविचिभिःसरसामरालरुचिरायताऽलिभिः॥६९॥चक्रांगानांमुद्यतामंडलेनस्तीर्णाकाशां
कांक्षणेनापगानां॥गामातन्वन्केकिहृदानिवर्षास्तीर्णाकाशांकांक्षणेनापगानां॥७०॥अवहतशर-
दृंछमाशयंसरसमपांसुमनाविलंघनं॥मरुतमपिविगाढपद्मिनीसरसमपांसुमनाविलंघनं७१॥
इतिशरत्॥सोभूद्दुत्यत्रशरद्विधोर्भाकलावसन्नामरुणाद्विमानी॥स्त्रीणांचकामःस्मपदंप्रियेः
व्याकलावसन्नामरुणाद्विमानी॥७२॥परिरंभणंपतिषुयेनऋतोःसहिमादकामितरसोरुचितं॥नव
वधूजनःप्रणयिनाभिनवस्संहिमादकाऽमितरसोरुचितं॥७३॥उत्सवःप्रियवतीषुतपस्यःकांचनारम
यतारमणीयः॥नइतिम्रमहरंहिमशेषकांचनारमयतारमणीयः॥७४॥प्राप्यसर्वर्तुमेलकसमृद्धिमना
धिकांतांसानंदमन्मथबलोद्भमनाधिकांतां॥सोभ्राजतद्विरथयंस्वरसानुरागाद्दिव्योजनोस्तसुरभू
धरसानुरागात्७५॥ ॥इतिमहाराजदर्वासिंहाज्ञानुवर्त्तिनःकविपंडितापरनाम्नोमोहनभट्टस्यकृ
तावानंदांकेपदसमुच्चयेकंसवधमहाकाव्येऋतुवर्णनंनामत्रयोदशःसर्गः॥१३॥ ॥वनराजिशो
खरिषुसानुमतःशिखरेषुभूतलडुरासदवया॥विविधर्तुरागरमणीयतदविचिनंदनसमृद्धिरिव॥१॥

अभिपद्यतेस्मनःसहोपनतैर्जनएवचित्रपदवीमृतुभिः॥सफलद्रुमप्रसवचित्रतयावनराजयोपिसम
भाविषता॥२॥ऋतवःपरस्परविरोधवतीमहङ्गस्थितिंहरिसिसेविषया॥उभयंसहेतुकतयार्थविदाम
पिसंधिविग्रहमसन्नियमं॥३॥समकालवर्त्तिनितदर्त्तुगणेनजनोभविष्यदनुविस्मयवान्॥स्थित
कार्यकारणमवीत्यहरेर्यदिपर्यवेष्यदनुभावभासो॥४॥हरिसन्निधानगुणजोवहधेसचराच
रस्यजगतोतिशयः॥अथतंजनोगणयतिस्मयथाऋतवःस्वयंव्यतिकिरंतइति॥५॥दधतंतरू
ननुपयुक्तशरानिषुधीनिवाविरलपुष्पभृतः॥कुसुमायुधस्तमृतुयोगमलंसमवेतसाधनइवा
न्वहषत्॥६॥अथषड्विधर्तुबलयोगभृताव्यमुहत्प्रियाविरहदुःखधृतिः॥विधरप्रहारपरमेणधृतिः
परितोभिषेणितइवात्मभुवा॥७॥सुहृदात्मनाऽगमिगिरिंविरहीविरहिदुःखस्तमृतवोविधिना॥इति
तंप्रसंगमनिशंविमृशन्भृशमन्वतप्तहरिपार्श्वचरः॥गिरिभागमाश्रितवतोपिऋतुप्रकरस्य
रसमयइवोडुपतेः॥वकुधानिरायितविलंबितयापरितोगुणास्मविसरंतिदिशः॥९॥विसकंठिकाशब
लनीलरुचोगुणितक्षणद्युतिपरिस्फुरणाः॥रजनीकृताचलदिशोजलदादिविहरवर्त्तिभिरदर्शिष
ता॥१०॥अतिदूरतोंबुदनिरुद्धरविद्युतिमंडलांतरसुखेषुतदा॥ऋतुभावितांबुधनचारुतयाविषव
जुरद्रिशिखरेषुदृशः॥११॥शुचिकेतकीवनपरागरुधोवपुरंबुदलघनशीकरिणः॥सफलद्रुमप्र-
सवगंधमुषःस्मरमारुतास्त्रगतयःपवनाः॥१२॥इतिहृद्योपहितलक्ष्मधनंतदशेषमूयुरभितस्तु
गुणाः॥समयमतीक्षणमपास्यविराडुदमीमदंतचपृथग्विहगाः॥१३॥हरिविप्रयोगहतसंहतिषुप्रमदाज
नस्यहृदयेषुतदा॥शिखिहंसकोकिलकुलस्यकुलान्यपिकूजितानिनकिलादृषता॥१४॥मलयानिलोऽनि
षुधेर्वशादवलंबितामसृणभावइवहरिरपीदृशांमनसिमानरजःसदृशंव्यकीर्दसुमनोरजसा॥१५॥हृदय
विरुध्यनिजमिष्टतमेस्वविमाननाममनुविरायगतो॥धृतिविप्लवेनदृषभानुजयामितरामलभिविरहो-

नुशयः॥१७॥ससखीजनोविरहविक्लवतामनुभूयसंनियतितर्नुगुणैः॥इतरेतरंसमुदितोरहसिव्यचिचिंत
दर्थविपरीतमपि॥१७॥ध्रुवमेकयापरमभाग्यजितःसहरिर्वनांतरमहारिरहः॥चिरमस्मदीयविरहेस्य
धृतिःकथमन्यथातदनुचिंतयता॥१८॥ननुसाहुश्चरमतप्ततपःकथमन्यथातिशयमापदसौ भवते
ष्टदंगवलयेनहरिंमृदुनाहिवंजुलतताभ्रमिवा॥१९॥भवतीभिरेवगुरुमानवशात्सचिरादक्षिलक्षितप्र
णयी॥इतिपूर्वदर्शनगृहीतमतिर्नचमानयिष्यतइयंहरये॥२०॥प्रणयेननिर्विवरसंधिमताहृदयंन्य
सीषिवदसुप्रतिमः॥कथमात्मनाद्यदृषभानुसुतेतवपर्यसीषहृदसौविरहं॥२१॥इयमेतिराजिरलिना
मवनुर्वनराजिगंधवहपार्श्वचरी॥यइतोनुकूलमनुधावतिनस्तमभीष्टहृतमवधारयता॥२२॥सहृदस्य
भेदपरिशंकिमनामनुतेहृतमलिमोपयिकं॥नवमंजरीप्रणयलोलतयावपुषोगुणेमनचसुखा
यमिवा॥२३॥त्वमिहागतोसिहरिहृतनयाप्रथमंतदीयमभिधेहिशिवं॥तदनंतरंकथयतन्मधुप
वयियन्निवेशितमनेनवचः॥२४॥नपुरासपर्यषहतव्यवधिंनयनाग्रयस्त्रजनितंकितवः॥अथतत्रदेशमवतं
सयतिप्रहितोभवान्भ्रमरदूतवतः॥२५॥सपरामर्चीकमतचेहृदनःकिमिदंधुतेनशिरसाक्षिपसि भवत्य
वागुतथालिपतेवसकेशगर्भकपदेद्विहनः॥२६॥स्वयमेवतावदवचापयतेकुसुमान्यगःकुसुमभारनतः
हरिणातिकामरुचिराकृतिनानमहत्समंप्रवसताविहितं॥२७॥हरिमध्यजीगपदिमांशठतामवचेष्टदृ
मितःसमथान्॥त्वमपिद्विरेफसकृदात्तरसानवमंनवमंजरीर्ध्यररहः सहसा॥२८॥मुकुरानतःस्पृशसिपा
दयुगान्युपकर्णमूलमुपमंत्रयसे॥त्वयिसंक्रमय्यनिजहृत्तमलेकिमसौविडंबयितुमिच्छतिनः॥२९॥न
नुविद्यतेनुनयकोविदतांचरणाग्रहंजहिहिकांतसखा॥सुहृदश्चतेभ्युपगतःप्रणयःप्रथमंतुवाचिकमि
दंहरनः॥३०॥विरहदुरुत्सहतयाभिमतेपृथगास्थितावधिनिषेधतया॥तवनस्तथारहसिनर्मवतीननुवाग
वोचतमनोविषमा॥३१॥परिवर्तनेनहृदयस्यननुत्वमचिक्रपोस्मदबहिःकरणां॥अथविश्वमोहननयुक्त

मिदंपणमप्रदायतवपण्यहतः॥३२॥तवरंजनायपरिहासविदःप्रकृतंनमानमनुरज्यसिनः॥त्वयिविश्व-
भामवतमास्मविरादियतेवनस्त्वमशशासइति॥३३॥इतितंगृहीतवचनार्थमिवभ्रमरंप्रजंतमनुकांत
दिशे॥उदचालिषुःस्वयमनन्यरसानहिलाघवंगणयतिप्रणयः॥३४॥मृगलोचनामुखमृगांकभृतोमृ-
गिताःस्मरेणमृगयापटुना॥चकिताइवमृगयंतहरिंगहनेषुमृग्यइवयूथमृगं॥३५॥अपिवेदितुंगतिम
बोधवतःप्रमदाहरेरचकमंततदा॥अचिनंनवेतिनहिशामयतेहृदयेसतिस्मरहृतेहृदयी॥३६॥अधुना
यथासिसहकारलतेनवयौवनेन चिरमेधितथा॥अपिमास्मरीरहदलिर्भवतीसखिवेत्सिकुलपदवीं
वदनः॥३७॥दिशमस्पथंसकितवस्त्यगतांविदितहिसातुलसितेभवतीं॥हरिवल्लभेहरिरकारितयातव
संविदानइवनभवसेत्॥३८॥विषयेवसंतमिहसंनिहितंजनएषकुलमवकल्पयति॥कुसुमस्मितानि
नहिवस्तमृतेवनवीरुधःकुरुतनःस्वसखी॥३९॥तवपक्षधारणरतःसभवानितियुज्यसेत्वमपितत्र
रतिं॥नियतंचतेस्तिविदितःसहरिस्तदमुंशिरखंडिवरदर्शयनः॥४०॥पदकोकिलमसवतिकुहरिःप्रतिकू
लतामुतंविधेर्धिगिमां॥मधुरस्वरप्रकृतिरप्यधुनाभवतीवनःपरुषमालपति॥४१॥वनराजयस्तव
मधुस्रुवतांदुहितांदिशोपिशुभगंधमलेः॥अचिसत्वयाकचिददर्शिवनेवपुषोगुणेनयमनुभ्रजसि॥४२॥
वनमालयोत्सुकतयासमतांयुवयोर्जनः किलसमात्तथत॥स्वगुणेनयस्वतमलिन्सरसाःसहिमाति-
पादिलतिकास्त्वमिवा॥४३॥इतिशल्यवेवकथयापरितोगिरिकाननान्यजगवेषदसौ॥वनिताजनोहृदय
सन्निहितंप्रतिबोधधानिवजगंतिहरिं॥४४॥पदलक्ष्मणांविकपदद्विभुवंकुलिशांकितेनकिलयांविहरन्॥
अथतांविलोक्यजहृषुःप्रमदाइहवर्ततेहृदयचोरइति॥४५॥सतुसहितीयइतिसेर्ष्यधियःपदलक्षणैः
प्रियमनुव्यपदन्॥अथतंविभाव्यसुहृदानुगतंभृशमन्वगर्वितवामदृशः॥४६॥पृथगास्तनकचिदनेनहरि
र्व्यजुगूहदस्यनरहस्यमपि॥किमतमतप्यतेषतपइत्यबलाः सहचारिणेकमितुरस्पृहयन्॥४७॥मलिनी

पलाशयनंवहरेःपरिवर्तितांगपदपांडतया॥इतरेतरंप्रतिनिरूप्यमुकुर्विरहज्वरंचिरमधोपुरिव॥४८॥
प्रियसंनिधानपदभाजिगिरोसहसैवसाध्वसगृहीतपदाः॥वनितावितश्चमुरमंदगतिश्चमवद्-
बिंदुरुचिरावयवाः॥४९॥प्रणयीसदेरादुतिचोन्मनसःप्रमदाविनेवमदिराममदन्॥अपरस्पराश्च
रहसिव्यहरन्हरिकेलिनाटकमयेललितैः॥५०॥यमधिष्ठितारहइतिस्वगतंव्यवरीषनाभिलषि-
तंललनाः॥सयदृच्छयेवहरिणाविषयःसहचारिणासहसमास्क्रियता॥५१॥हृदयंपुराललितसं
वरणंसुदृशामलंघतसशेषमिव॥मुमुदेसमग्नमिवतत्प्रथमंसतदानुभूयवनगूढतनुः॥५२॥
विरहाकुलासुभवतीषुपुरःस्वयमागतंगिरिधरंकृपया॥इहमांविदांकुरुतयूयमितिप्रतिभावती
प्रतिजगादवचः॥५३॥इतरोगणःसमचिकीर्तदिदंबलवद्धनश्चिवनजाक्षकृपां॥यदिनोभवान्व्यव
धिसंन्निधिभिर्वपराणिणत्समजीजीवदपि॥५४॥अबलाजनोपिहृदयंत्वयिमाप्रणिजीहयद्यदिन
संस्तमः॥हरसिस्वमर्पितमिदंपरतोनजहासिचात्तमितिसाधुरसि॥५५॥स्वगुणेनयामयसिचांतरि
मंजनमन्वयेषिचनचासजसि॥निजनामधेयतुलयेवहरेत्वमचीचकासइतिहीश्वरता॥५६॥
यमयत्यथंतवजनोग्रितलंतदुपक्रमंरमणविज्ञया॥नयथापुनविरहयेयमयेरधराभृतेनचयये
श्वरतां॥५७॥अथशंकितेवहृदयेश्वरतःप्रणयप्रतीपमभिधातुमनाः॥प्रथमाप्यशुभ्रवदिदंवचनं
मृदुहासमंडितकपोलतलः॥५८॥अहमीश्वरोस्मिनवमेजगतिप्रियमस्तिकिंचिदथवाविमतं॥
मयिनिर्निमित्तमखिलात्मतयाजनतारतिंसृजतिकिंविदधे॥५९॥अवधूयबांधवजनंसुकृतीम-
यिसृज्यतेहृदयमेकरसं॥अथयामिदृष्टिमथमस्यसुकृन्मुनयोपितन्ममविदुश्चरितं॥६०॥अथ-
धीरितःप्रणमतेसुदृशांगणयामिकापुरुषमेनमहं॥पुरुषोत्तमस्यपृथगेवगतिर्दयिताजनंनमय
तीरतया॥६१॥तदुपेत्यवृत्तिमनुबिंबसमांतनुमध्यमाभजतमामनिशं॥अनुभावितानभवतीभिरथो

विरहस्तथासतिकदाविदपि॥६२॥इत्यास्तथेतिरचितांजलयोविनयादिदंवचनमादिषता॥भवतुप्रभोज
नमिमंप्रतिमविरहात्परमनिरवग्रहता॥६३॥अनुयोज्यतांगतमधीरदृशामनुलज्जितःस्वमनुरागगु-
णां॥उपपन्नपृच्छइवतत्प्रणयारतमत्तमक्षमदृपश्चहरिः ६४॥अभिशंकितःप्रणयिनीभिरयंनजनःपुरो
भवितुमुत्सहते॥वदतांवरप्रथममेत्यभवान्गमयेदमूमयिविमत्सरतां॥६५॥इतिचोदितःप्रियतमोह
रिणासुहृदासतादृगणमेणदृशां॥दयितस्यतंहृदयदूतमिवप्रतिलभ्यताभृशमुदश्यसिषु॥६६॥चतुरे
भ्रुवोवचनमादरिसुखमागतंतवपरस्यतेकसखा॥अथयांविनोदयितुमुन्मनसोममगौरवात्सगिरि
मभ्यपतन्॥६७॥गिरिसंपदर्तुगुणभूषितयाहिगुणंगतोमनसिविक्लवतां॥सहिमामदोषयदृष्टगतिं
विफलक्रियःस्वजनमार्तइव ६८॥अपिकारणंभवितुमर्हतियद्विजनेविसृज्यतमितश्चरमि॥६९॥
अपिसस्वयंगदितमात्मवचःप्रतिसंस्मरिष्यतिचलप्रणयः॥उतनस्यवर्त्यतिकृपाहृदयेसजनोमद
कगतिरेकइति॥६९॥सचभारतीमचचकासदिमांकिमशंकनीयमभिशंसथतं॥अथबोधयामिकि
महंभवतीरधिदेवताःस्थनुतस्यहृदः॥६९॥यदमुष्यमानसमचूचुरतप्रतिलंभयिष्यथतदेत्यथदा॥सत
तःस्मरिष्यतिसमस्तमपिस्मृनयेधुनाहिवपुषोप्यनलं॥७०॥अरतिस्तमस्कपयदप्रतिमासहकारणेन-
विदितायदिवः॥अथयांविनोदयितुमुन्मनसोममगौरवात्सगिरिमभ्यपतन्॥७१॥गिरिसंपदर्तुगुणभूषि
तयाहिगुणंगतोमनसिविक्लवतां॥सहिमामदोषयदृष्टगतिंविफलक्रियःस्वजनमार्तइव॥७२॥गिरि-
रोपचारविधिभिर्नहरेरतनुज्वरेणकथमप्यशमि॥अनिदानवैरिनइयाखिलयाक्रिययाधगामिमम-
निःफलता॥७३॥परिपृष्टवंतमपिमांप्रतियन्निभृतंन्यगोपिहरिणात्मगतं॥तदशंसिकेवलममुष्यदृशो
र्हृदयेनवारियदपामिमुकः॥७४॥उपगास्यनाधरमनापियदिकाचिदस्वतन्त्रमनसामुसर्ला॥अधिशुद्ध
मूर्छनतयाभिमतंनहिमत्सरेणदयिताकपति॥७५॥इदमेवबोधयितुमुन्मनितोभवतीरदर्शमनुकूल

॥कंसवध॥ ॥३८॥

विधिः॥ इह वित्थ यूयमपि तस्य चिरं न हि शामितार्तिरमहौषधिभिः॥७६॥ श्रवणानुकूलवचसोस्य तदाक
थितानि भीरुभिरुपाचिषत॥ प्रियदुःसहं गणयतामनसोस्वमसंनिधानमपराधमिवा॥७७॥ अथ हृद्यमंत्र
रुचिरैर्मुरलीरणितैरेतावतविलासवता॥ प्रसभं नयेर्युवतयस्तनुभिर्वरटाइवोभिभिरिहारिषत॥७८॥ अ
भिसारितासुरमणीषु हरेरपरे मंतुः समसुभौ कृतिनौ॥ विषरमहाररसिको मदनः सलघूपचारपरमश्वस
त्वाविरहाधिलंघितकृशावयवं हृदयेश्वरं प्रति निरूप्य मुहुः॥ वनितामनोरथकृतार्थतयायुगपत्स्मसेदुर
पि सेदुरपि॥८०॥ सुनिशामितायवृषभानुसुतान्यवकाणदप्रतिभयार्द्दृशो॥ सचलं भितः स्वयमिवानु
नयं मुमुदे चिरानुशयया प्रियया॥८१॥ गतयोव्यकारिषत विभ्रमजाः सुदृशां मदोत्तरुदशिश्चयत॥ दयि
तांतिकेऽमृतमपुष्णतवागधिकं समरूतमुखेऽरुचि॥८२॥ मदनेन चास्य नवपुष्पमयविशिखैरघानि
षतनावयवाः॥ अथ किं ततोऽवधिषताधिगुणैस्तरुणीजनैरितकटाक्षमयैः॥८३॥ उडुपः कलाभिरिव संनि
हितः प्रमदाभिरेकपदएव हरिः॥ स्वयमुल्लसत्सकलकांतिचयः कृशतामुमोच विरहार्त्तिमिवा॥८४॥ कांता
जनः सहरिसंकथयामुहूर्त्तं विश्लेषदाहममृतास्तरयावधूय॥ तां प्रत्यसिद्धदनुव्यतिषंगलक्ष्मीमानंद
धामविषयः खलु निर्द्दुतानां॥८५॥ ॥इति श्रीमहाराजदेवसिंहाज्ञानुवर्त्तिनः कविपंडितापरना
म्नो मोहनभट्टस्य कृतावानंदाकेपदसमुच्चये कंसवधे महाकाव्ये विरहवर्णनं नाम चतुर्दशः सर्गः॥
॥१४॥ ॥इति तिङंतसंग्रहः॥ ॥अथ सुबादिसंग्रहः॥ ॥दूषितस्य विरहेण पुरस्तादंभसामिव
निधेलवणेन॥ योषितस्त्रिभुवनस्य हरिर्वा नाखिलगुणमजाग्रदुरिष्टं॥१॥ सत्यवारुजगदुच्चमदा
नां संगमेव रिहतीडुभयेषा॥ केवलं सहिगुणायनतेषां तस्य खल्वपि निशेडुसधर्मा॥२॥ इंद्रियैः किमि
तरेतरसंस्थैरन्यथा बभधुरमीहितयेपि॥ शून्यतामिव यदत्यवियोगे संगमे पुनरभूदिव विश्वं॥३॥ दृष्टयो
पि पतिषन्नवियोगकालसंभृतगुणेषु वनेषु॥ संनिधौ तु न हरेरबलानां प्रेमतेषु दिदृशिर्ह्यपतिस्म॥४॥ या

निपूर्वमरुचन्नतदानीं तान्यरोरुचिषतप्रियपार्श्वे॥ कानननानि ऋतुमंति वधून्यः कल्पतेपरिगुणाय
हि सुस्थ॥५॥ तानुमानथ वनानि ऋतूनामुद्भमो मृगदृशां प्रियपार्श्वे॥ इत्थयं व्यतिकरः समवोभूदा
नुपूर्व्यवरलंकरणाया॥६॥ कृष्णमंबुदसमं हिडयंतीस्तानिरीक्ष्य हरिणीसमभासः॥ विद्युतो न चिरमध
तनेपि व्रीडयेव दिविदिद्युतिषंते॥७॥ ते मिथः प्रियतमाय विलासैः प्रावरीहृतिषतानुदितेर्ष्यां॥ अंबुरा
शितनयाकृतकायव्यूहवर्त्तिनइवेष्टविभागा॥८॥ इरसंनिधिमथेप्यनुबंधे निर्विशेषरमणीयतरस्या
॥ नैकधानुललितेस्थ यथास्वं नास्त्रियः स्मामिथ इर्ष्यिथिषंति॥९॥ आनरीनृतिषतेधवधूनामंगा
केषु मदमन्मथभावाः॥ वर्द्धतस्म यदधांतरभेदस्थानएव कुसुमाथविचीषा॥१०॥ स्नापिताधरदलस्मि
तपुष्पैः सन्निधिस्थितपदात्वबलासु॥ आत्मसंश्रितलतासुतदानीं शाखिनोपिदधिरे रुचिमाद्यां॥११॥
वीक्षणाद्भविगुणेनविलोलासुभ्रुवांसमजिगंसतनूतनं॥ सायदंजिजिषतिस्म वनालीलीनषट्पदरु
चाकुसुमानि॥१२॥ आजुहावयिपुरस्थिरबर्हैः संपिपृच्छिपुरलिहिजनादेः॥ आरिरात्सुरिवताधनरा
जीमारुतेनकुसुमान्यदुदोकत॥१३॥ स्त्रीगणस्यतरुकंपनरागेलक्ष्यमाणपिहितावयवस्य॥ स्वंवि
लाशयमपाविवरीषोर्व्याजतामभजतावचिकीषा॥१४॥ तद्दुदूषितपदाहिमहांतः संग्रहेपुदधतेधि
तितीर्षां॥ पादपाधचयसक्तकराणां मंदमारुतधुतांधरणानां॥१५॥ वल्लभाभिमुखवृत्तिपरीक्षासा
रितानि नयनानि विरेजुः॥१६॥ तं सदेकमनुभावगुणेनस्वैकसंमुखतयामुवतीषु॥ तासु विभ्रमवतीषु
मनोजोनाधिपर्त्तिषतसंकुचितेऽभूत॥१७॥ स्वाशयस्य सकलग्रहमस्मैशेषशंकिनइवाभ्यनिनीषन्॥ व्या
जिषुर्यदनुपुष्पविचायंधा मूलवल्लिनाभितरुण्यः॥१८॥ ताः परस्परकरस्थितवीरुत्पदांसुमुषिषामपदि
श्य॥ संभ्रमच्छवयदैः स्फुटलक्ष्यैः कौतुकं कमितुरन्वविदत्सन्॥१९॥ रेणुभिर्विकिरताकुसुमानां भ्र
ताकिसलयभ्रसयाग्रे॥ सौरतेन गुरुणाधिजिगांसामासुरायतदशोललितानि॥२०॥ चूर्णमाविकरिषोद्द

शिकांतेरुंधतीस्तनपटोद्धुरणेन॥कापि गूढनवयौवनलक्ष्मीमाचरन्नयनयोरुपहारं॥२०॥रागिणि
क्षिपतिमुष्टिपरागंमीलिताक्ष्यपयतीरिशिमूढा॥काचिदाशयगतांपरिरिप्सासंभ्रमादनुबबंधफलेन
॥२१॥व्याजशून्यपरिरंभितगात्राद्दृष्टिसाम्यविधियुक्तकपोला॥इष्टगूढकुसुमप्रतिपित्सांप्रेयसोनिरवि-
शच्चिरमन्या॥२२॥काचिदिष्टकुसुमायवदंतीमुग्धखोविविदिषामसमाप्य॥सस्वयंग्रहसिसाहृयिषायाः
कारणादुपजुघुक्षुरुदासी॥२३॥रोमहर्षरमणीयकपोलस्पर्शकौतुकवशादपरस्याः॥सोतितंसदवतंस
निवेशेवंजुलप्रसवमात्मकरेण॥२४॥यांप्रियोललितभूषणलक्ष्मीपुष्पपल्लवमयीमललंभत्॥देव-
तार्त्तवगुणेनवनांकानारुरोविषुततामतिशय्या॥२५॥प्रासवक्षिमयरूनिमदोलाहैभभक्तिकृतमू-
र्द्धजपक्षा॥अन्वचर्करिवुतास्यपताकांमन्मथेनविजितांहरिमेका॥२६॥कांचितेषुकुसुमेषुतरूणा
मुद्धयोसदुपयोगफलश्रीः॥तद्दुरर्पिपदाहिमहांतःसंग्रहेषुदधतेवितितीर्षां॥२७॥शीतितदुमलता
कृयहेतोराश्रुतेष्टपरिरंभणशुल्काः॥प्रेयसोपजनितार्थविवादाश्चुंबनग्रहदिदेविषयेवा॥२८॥स्मकृप्र
सादफलकांक्षिविलासिस्पर्शितांघ्रियुगपल्लवरागाः॥आलिलेखिपितकामरहस्यव्यक्तिकांतकृतव
र्णकरस्याः॥२९॥लोचनच्युतपरागजिहीर्षामर्षितप्रियसमुन्नतितास्याः॥ईर्त्सवेमनसिजायमनो
पिच्यातितांसवइवास्यविलासैः॥३०॥कुर्णुभूषितमुपेतनिमित्तादंगमय्यनलमेवपिधातुं॥आपरिश्र
ममसंहृतरागाःसुभ्रुवोमदभरेणविजह्रुः॥३१॥कुलकं॥काननेघतिविलासविहारेयोषितामुदित
घर्मलवानां॥निर्मलेनपयसासरसीनांचेतसिप्रवहतेभिषिषिक्षा॥३२॥स्त्रीकदंबकमवर्त्ततयावत्
तावदाकृतिरलंहरिरासीत्॥तामभोरथसिषाधयिषार्हेनास्यसन्निधिगतंतमपश्यन्॥३३॥तद्विधा
दथविसिस्मयिषार्हान्मत्सराधृतिरुधोस्यविभुत्वात्॥रिक्ततापिविशिखैर्मदनेनप्रायशांतरमला
भिनतासां॥३४॥खेदसन्नविषमांघ्रपदानांप्रायशःप्रेणयिदत्तकराणां॥तोयपार्श्वमनसामधला

Dr. BHAU DAJI MEMORIAL

नांसाधभोजिगमिषांगविलासैः॥३५॥संगमार्जितविशेषगुणासांशिक्षतिस्मविरहेनवनश्रीः॥इत्यसंगमपुन-
र्विनिहत्यैसाहरिप्रणयिनीरनुपेदे॥३६॥योषितांहृषतयाबभूदभूत्किंतावतनुरुपसंहृतयोगः॥यद्दनेलमदिरीपि
तलक्ष्मीस्तद्दरामइवतासुगतासु॥३७॥हृप्रियोवनमदीपयतांप्रागर्त्तवीयुवतिसंनिधिजाच्चा॥निर्गमेनुसतित
क्षणमासांनापरादिधरिधिष्टपराचा॥३८॥अंगसंगिशुभगंधहृतालीःकृप्तपुष्पदलपल्लवभूषाः॥विभ्रकर्ष
मथभिश्रियियंतीरन्वगादिववधूर्वनराजिः॥३९॥माल्यचित्रकबरीरनुकर्तुंबर्हिहृदमुदपुष्यतासां॥लोचनोत्प
लरुचिंधवलांतैर्नाम्बकल्पतकथंचिदपांगैः॥४०॥हंससारसरथोत्थधृतीनामूर्मिवातहृतघर्मलवानां॥योषितां-
निमुमुक्षतपीतेलोचनैःपयसिदूरमुदन्या॥४१॥मोक्षमाणमिवगाढतमिस्रात्प्राणिणिद्विवपरेणविमोहात्॥
उत्मिमंक्षुदुरकादिवतासामुह्यितश्रमतयाजगदासीत्॥४२॥ताःपयस्वमरुताहृतखेदादूरतःसमविभावयिषन्तु॥प्रेयसोपिनहिदर्शनमात्मन्यप्रसादिनिमुदेभवतीनां॥४३॥आत्मभिःसहविहर्तुमुरस्यामासुरूर्जितरसाःपुनरुच्चैः॥तास्तथोर्मिपवनैरसपर्यन्पद्मिनीपरिमलैश्चजलानि॥४४॥कामिनीगतिविलासजि
गीषानिर्विदःकमलराज्यमपास्य॥प्रभ्रमंतइवतत्रमरालाःशैवलेनसमचीवरयंत॥४५॥मोदकंपपुलकाः
प्रथमंताःप्रीतयेसवयसामविविक्षन्॥नांभसश्चिरमथोत्तितरीषामासुरूर्मिभुजसाल्कृतकंठ्यः॥४६॥
कूललग्नवसनस्फुटलक्ष्मीपीतजलनिधिःक्षुभितोघः॥अंगमूर्णुनुविधुस्तरुणीनामुच्छितानिवततानतरंगान्॥४७॥नाभिदघ्नजलमास्तनमुच्चैरूर्मिभिःप्यधितजातहरीर्ष्यां॥शंकितागइवचापसरत्तेराद्दथूरुयुवतीर्ध्युवृषत्॥४८॥विभ्रमानुगुणवृत्तिसखीनामर्थितांविभरिपुर्मदनस्या॥इच्छयेवकिलगाधगभीरंप्रत्यय
यात्सहरिरंबुचकारा॥४९॥क्लिन्नवस्त्रविहतावयवानांगाधतःपरमनामुवतीनां॥विस्मयोदयदर्शुदृष्टिश्री
डमिद्दसितःसुदतीनां॥५०॥गाधतांजहतिजातुकृशांग्यःसंभ्रमात्पयसियावदनाब्धन्॥आत्मनोसतुलितेसु-
विलासीतावदंतिकचरोवललंघे॥५१॥करुस्त्रीजनसितरिपुभुजशक्त्याकांतकंठमभजद्दिनिहन्तः॥भोगिदीर्घ-

निजवेणुलताभ्यः स्त्रोधसाभिमुखमागमिताभ्यः॥५३॥श्रोणिसेतुविहृतः ससखीनां संमुमूर्छिषुरपिक्षणमोघः
मध्यमस्य परमाणुतयोच्चैरागमत्प्रकृतिमेव पुनःस्वां॥५२॥स्तनीविचपलेक्षणमास्यं कामुकस्य मधुरस्मितमुख्यः॥
इर्ष्यिया किल पराङ्मुखयत्यः प्रेरितैः सिषिचुरंजलितोयैः॥५३॥अंजनस्रगनुलेपनहारान् प्रत्यसूयतइव स्मतदंशु॥
तत्पिधानमपनीयवधूनामुज्जहार यदरुक्मिमशोभां॥५४॥पंकजैर्विनिमितान्युपयुक्तैर्वन्यकल्परचनान्यबलानां॥
संभ्रमेषु गलितानितरंगैर्मंडनानि समभांडयतांभः॥५५॥मज्जमग्नमणिदामधनायावश्यतामुपगताभिरदंभां॥
कामिरप्यतिमनोरमनर्मा संविधाय्यबकुधाभिमतार्थं॥५६॥वक्त्रसेचनविधिव्यतिहारैनिःसहानभिमुखैर्मुखपद्मैः॥
आत्मनासपरिनेदयतांभः स्निग्धमंगमनुमृद्यपरासां॥५७॥पद्मिनीवलयगूढदिगंतैः
कंतसंकलितशेषमनोज्ञैः॥उत्तराधिकगुणैः स्नजयिष्यन्नंबुजैरनुचरीरमयित्वा॥५८॥आजहार हरिरंबुविहारैर्दुर्लभं
रतिपतेरपिकामां॥सस्यसंहृतमितः शरमुत्काः स्ववधूरलमिषुध्यति हंतुं॥५९॥कुलकं॥आसमुत्तरणमंबुविहारैर्वीक्ष्यतस्य वनितासविवस्याः॥सापराधइवदीधितिमाली प्रत्यगाद्विवरिषन्निजबिंबं॥६०॥वासरस्य
रुचिरंपरिणामं तं विलोक्य शिशिरानिलभूतां॥कर्णलेह्यमजुगुप्सितशब्दं केशवः सहचरीरिदमूचे॥६१॥म
श्यतायतदृशः किरणानामीशितारमुपसंहृतवीर्यं॥तेजसां द्युतिमतां जनितातंलोचनान्यपिलुलं
घयिषंति॥६२॥संप्रचार्यपरितोनुदिशंगाः स्वालयायहरति ध्रुवमर्कः॥लोहितायतिमदस्ततटांतेत
त्पदक्षुभितधातुरजोभिः॥६४॥लोचनीयतिजगन्मुकुटीयत्यभ्रमास्यतिलकीयतियद्दिक्॥तस्य पू
जितसमस्तदृशस्य प्रीतये सवितुरस्तमयोपि॥६५॥संचितापचितयादिनमध्यात्पूर्वपश्चिमदलं
क्रमवृत्त्या॥उच्चनीचगतिपर्यवसानं निर्दिशंतिरविः स्वरुचेव॥६६॥हंत्युदेति हरतिश्रियमिंदोराविभजिषतिधामभिरुर्वीं॥एकवासरविभूतिनिमित्तेसर्वमीहितमिदंतपनस्य॥६७॥वल्लभाकगतचित्त
दृषस्य स्कामिनीजनसमत्सरदृष्टेः॥शंकमानइवसंहृतदीप्तिः पाशिभोदिशितिरस्यतिसूर्यः॥६८॥

भास्करज्वलनपिंडनिपातज्वालितापरपयोधिदवाभैः॥उद्धृतैस्तरुणसांध्यमयूखैर्लोहितीय
तिहरिद्दरुणस्य॥६९॥यावदेष चरितस्यतिलोकस्तावदस्तमयतेपितृमाता॥अल्पमेव भवमध्यनमस्याभाजनंरवरुपणायतिसर्वः॥७०॥वध्यमानमुकुलांजलिपद्मप्रार्थनामविगणय्यगताऽऽ
एकपद्मनुजिगांस्यत इत्थं संध्यया प्रथितमात्मसतीत्वं॥७१॥अद्भिन्नकमलोत्पलकोशैर्व्यत्ययान्
दभिनयोचितहस्ता॥यामिनीपरिनिवृत्सतितारामालिनीकुलितशार्वरवेणिः॥७२॥निग्नहेपि सतिसांद्रतमिस्रैरक्षिसंप्रतिसुखायतएव॥अज्यमानरुचिमद्भुतारासंकुलामलनभःपरभागैः॥७३॥
क्षपतेविरमहन्यभिलीनः कौशिकैरधिगुहंतिमिरौघः॥सोवगल्भतइवार्कविरामेस्त्रुखेषणिविषेणयि
षावान्॥७४॥गालितापितमसाभुवनश्रीः स्तंभितेयभुभयेरुभयश्च॥हासमुज्जगलिषद्भिरुदर्चिः
कैरवैर्भुविदिविग्रहरुक्षैः॥७५॥यावदंधतमसस्थगितांशोलोलुपीतिजनलोचनशक्तिं॥तावदस्त
यमिंदुविपक्षोनास्थिरमलिनमिच्छतिवेधाः॥७६॥दुर्यशायितमुदग्रतमोभिः संहतार्कविभवस्यविधातुः॥इंदुमुद्गमयतः शिशिरांशुकोमुदीप्रतियशस्यतएषा॥७७॥कामभस्तमितमिरस्फुटलोकं चंद्रो
दयविधिदिनीयतिसर्वः॥केवलंवसतिमोहतमोभिश्चक्रवाकमिथुनेषुतमिस्रा॥७८॥वल्लभस्यमुखतोदिवसांतेस्वीकृतंसरसमग्रमृणालं॥नाद्यानायतिमुमुक्षतिवासोचक्रवाकवनितावरहार्तो॥७९॥
वर्णितामलकपोलतलाभानायतानमृतवारिलवार्द्रान्॥यान्निमित्सतिमुखेषुकरान्वस्तस्तिषोषुस
तिमभेंदुरसूर्यां॥८०॥नाहतानितमसाभवतीनामानमानिसमबुद्धपुरस्तात्॥तेनभूनमहणीयतनोश्चे
राररुरुरुदयंहिमरश्मिः॥८१॥योषितामितिनिशम्यतदुक्तं सस्मितंपरसुधापरिषिक्तं भूयएवधवनवारि
विहारश्रांतमूर्तिरभृशायतकामः॥८२॥साधनानिचहरेरनुभावादीशितानिसकलान्यधिगच्छन्॥संभृ

नांगइवकाममभंगोविस्मयंगरयतिस्मरिवोपि॥८३॥क्षीरवारिधिपयायितपूरेचंद्ररोचिषिनिरुद्धदि
गंते॥अच्युतस्यचमथीननिकामेवारुणीसमुदियायपुरस्तात्॥८४॥स्त्रीजनःकथमपिप्रतिपेदेसंभृतंच
षकमिश्रितमेना॥इत्यमर्षमनुबध्यनिपीततत्क्षणादलघयन्मधुलज्जां॥८५॥निर्निमित्तहसितप्रहृ
तीनांगद्वदस्वरगिरामनुकांतां॥ताम्रयाजरिगृहीदलमश्णोराभयामधुमदःपरभागं॥८६॥अर्द्धपीत
समुदीरितमासांहासमंडितकपोलतलानां॥अन्विषेषचषकंसमधुस्यन्कंठसन्निधमितेभभुजे-
ना॥८७॥विभ्रमानधिजिगापयिषंतीवारुणीक्रियमपाकृतयावत्॥तावदुद्धयुरमीवनितानांसंनि
हृद्धिधृतोपमयेवा॥८८॥उत्थितस्थितसमुच्चलितास्याहास्यगीतकुपितप्रतिहर्षैः॥भूषितोवरिष्ठ
धीदनवस्थैःकापिशायनमरस्तरुणीनां॥८९॥अंगहारकरणैरवदातंचारिकास्थितिविशेषमनोज्ञं
रासनृत्यललितंप्रमदानामच्युतोप्रथयदीरितवेणुः॥९०॥दिव्यमर्दलरवाननुकांचीनूपुरेमृणमृणा
यतितासां॥रासनृत्यमधिकंविरराजेहस्तकप्रियतगूढरहस्यं॥९१॥अप्सरायितगुणंवपुरासांकेश
वःस्वयमतिस्मररूपः॥वाद्यजातमपिदिव्यमतस्तत्किंनरासमवभासदलंघयत्॥९२॥स्वेदभिन्नतिलका
निधभूनामाननानिरुचिमंतिनिरूप्य॥स्वेदनिःसहतरांगलतानामुत्सुकोमुकुरसावपिपासत्॥९३॥
पारिजातघनसौरभवाहीकेशवव्यजनधातलघीयान्॥नृत्यविभ्रमपरिश्रमभंगेयोषितामकनय
त्पृषदम्बः॥९४॥भूरिवाद्यरवशब्दविशेषःशक्तिभिःपरिवृतःसवधूभिः॥एकदेवमदनार्थमधीशःश्लेषचारुम
विवक्षदनेकं॥९५॥भासुषुप्सितनिभाक्षियुगानांवल्लभांकशयनेपतितानां॥दीपितस्मरतयासुरतानिव्या
पुराथसनविभ्रमणत्वं॥९६॥रत्नभासुरतलासुमहीभृन्मेदिनीषुपरिवर्हवतीषु॥मन्मथस्यसुहिना
हितभिदःसौधविस्फुरितदाधितिजालैः॥९७॥शब्दयद्वलयनूपुरकांचीसंविभागमयलक्षणवंति॥अ

मथंतहरिणासहतासांतत्रविभ्रमभवानिरतानि॥९८॥अंशुकेघनपगेषुपुरस्तान्मत्सरस्तदनुहा
रलतासु॥तस्यभेदमजिहासतिपश्चादात्मनिप्रवहतेवनितानां॥९९॥अंतरेसहजमेवनसेहेक्षीगुणं-
किमुतरत्नगुणंसः॥तंहिगाढपरिरंभपदेनस्त्रीजनोनिरबिभित्सदसंगं॥१००॥कामुकंचपलमंशुक
नीविस्रंसनेघनभिहस्तयमानाः॥अंगनारतिषुसंभृतमोहाःस्वाधरानुदपिपाययिषंत॥१०१॥व्यं
शुकास्मिदयितेनकृतेतिव्यर्थमभ्रपतकाविदधृत्वा॥साहितेनविहतांगरुचीनामुद्गमेनसमवस्त्र
यतेव॥१०२॥धाकुमध्यगतयाजनयंत्यारागमाहितनखाग्रनिपातः॥एकयासरतिकूजितवत्यापंच
बाणमुपवीणयतिस्म॥१०३॥स्वेषुविभ्रमरतेषुभिषक्कंमीनकेतुमतिहस्तयितारः॥काश्चिदुच्चलितकां
चनकस्याकिंकिणीकलरवैरसुसूचत्॥१०४॥दुर्दिनायितमुखीविकसद्भिर्भूभुजैरभिनयांशुदसांद्रैः॥
बाहुपाशनिहितंहरिमन्यानव्यपाश्रयदनुभिषतासी॥१०५॥आनंदमोहविनिमीलितलोचनानामायाम
वंतिसुरतानिविलासिनीभां॥संवर्मयत्सबलशंधरवैरिवीरसंरंभविभ्रमपटूनिभृशंविरेजुः॥१०६॥॥
इतिश्रीमहाराजदेवीसिंहाज्ञानुवर्तिनःकविपंडितापरनाम्नोमोहनभट्टस्यकृतावानंदांकेपदमसु
च्चयेकंसवधेमहाकाव्येरासविलासोनामपंचदशःसर्गः॥१५॥ ॥समाप्तिसंग्रहःसमाप्तः॥ ॥अ
थपदव्यवस्था॥ ॥अथान्यदानारदलक्षितेनसंगस्यमानश्छलमानुषेण॥भोजापिराजप्रहितः
प्रतीतःश्वफल्कसूनुर्व्रजमाजगाम॥१॥दिदृक्षमाणस्यहरिंहर्षःकंसापिशस्यचतस्यशोकः॥व्या-
त्यास्तवेतस्युभयस्तदानीसांध्यातपध्वांतसमागभाभः॥२॥अस्ताग्रशृंगांतरितस्यभानोरूर्ध्वंगते
नाक्षपमंडलेन॥छायावतारंप्रतिभिद्यमानंजलेशरिद्भागइवाददानः॥३॥स्वेदोदयोदीरितहव्यवाहेःशि
लाविशेषैर्ज्वलितैकदेशः॥नक्तंदुतेंद्रपरिवारिधारान्बिभ्रद्भिभागानिधसानुमाली॥४॥तृतीयनेत्रोत्थवि

तानलार्चिः परीतमौलींदुरिवेंदुमौलिः॥अदेशभेरादध्वतिष्ठमानौ दशौ नुषध्नन्निवभानुचंद्रौ॥६॥ऊष्मा-
यमाणः शमितार्कतापो निदाघभूभागइवाभिषिक्तः॥मेघान्नसूर्यांशुकृतार्तितापोऽकस्थिरोपामिवशी-
तगर्भः॥७॥उद्दिन्नशातद्रजातवेदोवहन्नवांभोदइवांबुवर्षैः॥संतापहर्षानुगतांतरात्मा सराजसंदेशहरो-
रराजा॥७॥ ॥पंचभिःकुलकं॥ । शौरेः सखायादवसिंहमेनं प्रत्युज्जगामस्मितपुष्पशोभी॥रामा-
च्युतौ शुभ्रसितेतराभावादायपक्षाविवचैत्रमासः॥८॥अनंतरं नंदसमागमस्य प्रीतः सताभ्यां समगं-
स्तधीरः घनागमस्यनुपदं नृलोकः कृतोदयाभ्यामिवपुष्पवद्भ्यां॥९॥विद्वान्सरामाच्युतरूपगुप्तं परंपुमां-
संमनसावचंद्रे॥नंदोपदेशात्प्रणतं पुनस्तं मोघेतराशीर्वचसोपतस्थे॥१०॥व्याख्याततत्वे विहरौ बुद्धस्था-
द्राजोपधेः स्नेहकृताविशंका॥प्रभावमस्याकृतिमाभलक्ष्यं प्रेक्ष्याभिचिक्षेप यदृद्धहस्तां॥११॥अनात्म-
संबंधविदो पिशौरेरामानुषंगात्सरतिं ननाम॥विश्वेशभक्तिस्वजनानुरागो चेतस्तमन्वाहरतां परस्य॥१२॥
यदुघजोसावजनीतिताधश्चित्रीयमाणः सहरिंददर्श॥राजान्वयोगोषविचेत्यनेन भूयोपिचित्रीयिषि-
बभूवे॥१३॥यदुप्रवर्हेयमुपस्थितो मामित्यागतं चाभिननंदगोपः॥कुलस्यनोसोशरणं किलेति सगौरवं सं-
विविदेसवेनां॥१४॥तमर्घपाद्यादिकथाप्रतीतः सपर्यया पाचरदर्घ्यशीलः॥अथातिथेव्याक्रियया विनीतः
प्रमंपुरः प्रक्रमते स्मवक्तुं॥१५॥कच्चिद्यदूनांकुलराजधानी सौमित्रिकीर्त्युज्ज्वलसौधमाला॥नक्लिश्यते-
निःप्रतिकारयोगैरुपद्रवैरैश्वरपौरुषयेः॥१६॥सकच्चिदुग्रोपिमहीपतिर्वः शक्तयारुणोऽकामिवहेमनानां
प्रम्लापयन्शात्रवपंकजानिपित्र्यास्वलक्ष्मीनपते प्रजासु॥१७॥पितर्यपि स्वेसुतरामसाधुः सकच्चिदास्तात
पतिष्वयः यस्तिष्ठतेबंधुषुसंशयी सन्नुत्तिष्ठते सद्यचिरेणभूपः॥१८॥कच्चिन्नभूयोवसुदेवहेतोरुदायता-
स्मेरबलपार्श्ववर्ती॥यस्तस्यनिर्विप्रतिपत्तिराजाबहून्यपत्यानिसमाजपाना॥१९॥इहैवमाभासहवर्तमा-

नः कच्चिन्नरामः स्मरयत्यमुष्मै॥स्नेहाभिधानाहिजनस्यमायासंयच्छतेदृष्टिमुपोदतत्वां॥२०॥पिफल्क-
सूनोः प्रतिवाग्विवक्षातंव्याददेकिंचिदिवाननेंदुं॥दंतप्रभाचंद्रिकयापुरस्तात्पर्यस्तयासाध्यतयस्यनं-
दः॥२१॥संपृच्छसे घोषपतेयथात्वं जानीषसर्वत्रशिवंतथैवा॥समृच्छतेश्रीः पुरियादवानामव्यापदः संस-
रतेनशश्वत्॥२२॥राष्ट्रेषुकंसाधिकृतेषुसंतं परोधिकुर्वंतपृथक्कंसात्॥अयंनवोदाकुरुतेविनाहः कथाय-
तेशासतिकश्चितास्मिन्॥२३॥नाशिक्षतेभायियितुप्रकारैर्नचापिविस्मायियितुमनीषी॥प्रतापवान्भापय-
तेप्रकृत्यागुणीचविस्मापयतेजनं सः॥२४॥कुलोचितानेकगुणोपपन्नदोषान्नपेक्षुः परिवारमूलाः॥धूमा-
यतेह्याभिननागवक्त्रैर्निश्वासिभिश्चंदनमारपोपि॥२५॥आरोढुमेकत्रसुखेनशक्यं कचिद्दुरारोहतयाप्र-
सिद्धं॥सौम्योग्रसत्वैरुपपन्नमार्याः संविश्रतेतंगिरिनिर्विशेषं॥२६॥फेनायमानैरुरुशोर्मिजालैः कचिद्दृशो-
दर्शयतेसहस्रः अमर्षमायामयतेपरस्य ज्वालोदयैरौर्वकृताशनस्य॥२७॥कचित्समुद्धृत्यभितस्तरंगैरत्ना-
निकूलक्षितिभृद्धतानि॥निरस्यतेन्यत्रवतीरदृक्षानुद्दिश्यमुक्ताफलमुक्तिकेशान्॥२८॥कचिन्निवात-
स्थितैःपयोभिर्निशायतेमौनमिवादधानः॥शब्दायतेश्रावणवारिवाहानतिस्पृशद्भिर्निनदैःपरस्य॥२९॥
चिभुवंनर्तयतेकदाचिदभंगुरांभोवयमाणमूर्तिः॥रत्नार्थमायासयतेयमार्तैस्तरांबुकैर्वंचयतेकदा-
चित्॥३०॥कदाचिदभ्याहतिशीकराणांरोधः शिलापट्टसमुच्छ्रितेन॥आसेदुषोगर्ज्यतेविहरंजालेनमुक्ता-
फलदर्शनेन॥३१॥याभ्यःकदाचित्सवितारमभ्रैः स्वैरंकरोत्याक्रममाणमुच्चैः॥तास्वेववीतांशुकभावशो-
भ्यंतमाभयत्यस्तमयंकदाचित्॥३२॥सुधारसंनिर्जरसः शिवंचविषंसुरांपाययतेसुरारीन्॥रत्नेसमंधासय-
तेभुजंगानायोधयत्यूर्मिभिरेधवोर्मिः॥३३॥नापामपायेषुशिशत्सतिस्यांनाभ्यागमेषुचरतेचवेलां॥उ-
दीर्यमाणोपिमहोर्मिभिःस्वैर्विक्षोभतेनप्रलयात्पुरस्तात्॥३४॥इत्थंयथाधारिनिपीगुणानामानंत्यमा-
यात्यपिचेतरेषां॥आदेयहेयप्रतिपत्तिकाष्ठांतथायमारोहतिपार्थिवोपि॥३५॥ ॥कुलकं॥भूयोभिरुग्रै

॥कंसवध॥ परिधारदोषैर्वंशस्वभावाद्गुणमंडलानि॥राज्ञोस्यनव्याहसतोज्ज्वलानिरत्नानिवादोभिरिवार्णवस्य
॥४३॥ ॥३४॥संक्रीडतेसाईमनेनलक्ष्मीराक्रीडतेकीर्तिरपीडवत्मा॥एकामनुक्रीडतिगांप्रतीतःपरिग्रहंवंश्यम
रिव्रजोस्या॥३७॥आपृच्छतेन्येनसमाजितस्तंयमानुतेन्यःसचतंस्तयीति॥तंवानुगच्छत्यपरस्तरस्वीस
हस्रशोन्येरनुगम्यमानः॥३८॥आतिष्ठतेदुर्पटमास्थितंचकरोतुचाफलदर्शनंसः॥इत्थंगतेनिःप्रतिबं
धकर्मासहस्रशःसांगिरतेदिनेषु॥३९॥उपुंजतेकेस्विदनेनसाईंतेजांस्यरातिष्वपिसंदृणधानाः योदि
ग्गजानामपिदंतकुंतेर्दोर्दंडकंडूयियिप्रयुक्तः॥४०॥महीपतेस्तेनविभूतिकामोवैरायतेकःकलहायते
वा॥महोजसोयस्यरवेरिवेनस्वानिलस्माणिनसंहरंति॥४१॥जन्मप्रदानेवदिगीश्वराणामंशानगुणैः
स्वत्वपिसोनुजहे॥मंथाद्रिवीर्योद्धृतसर्वसारामोदन्वतीतेनुहरंत्यवस्थां॥४२॥आराधनीयस्यदिवोपि
कोस्यशक्तोत्युपश्लोकयितुंप्रतापं॥यस्याभितापाद्विवशंकमानःपादानुदायस्तरवरानपुरोकृः॥४३॥
निरामयंवीतिगुणाधिकर्तुंचिरायकुर्धनूपदमेतदीयं॥प्रभावसाम्यप्रतिपन्नसख्यःप्रियाकरोतीव
तमीश्वरोपि॥४४॥दोषप्रतीकारपराणिदूरादायष्टमानानिगुणोदयेन॥अन्योन्यमर्थादुपतिष्ठ
मानान्यभूनिभूतान्युपकुर्वतेतं॥४५॥नित्योदयंभास्वरमर्थधर्मकरैरुपास्यंक्रममाणमुच्चैः॥स्तुत्यो
पतिष्ठत्यरिवलोजनस्तंयथाक्रचाराद्रुपतिष्ठतेकं॥४६॥प्रकुर्वतेनस्मयतःपरस्वंप्रकुर्वतेनस्वरत
स्वयेषु॥प्रकुर्वतेनप्रतिकूलवादानेवंकिलोपस्कुरुतेनृणांसः॥४७॥संपश्यतेसस्वयमेवसम्यक्प्रा
यश्चिनःसंस्मृणुतेर्थकृच्छ्रे॥शतेरुपानेष्टसयान्सुरारीन्कालेचामीस्वमतेनयंतो॥४८॥दोषांतरानीक
पतीइवद्वेदोषोक्रमेनेगुणभाजिकंसे॥यदाज्यलोभाद्गुरुमत्यशेतस्वसुश्चगर्भानसुतृष्छयाऽहन्
॥४९॥सुस्मूर्षतेनानकदुंदुभिस्तेस्वमंगजंन्यस्तमनुप्रीयाथ॥नमन्यतेसोपृथगात्मनस्वांरामंचह

॥४३॥

ष्टादितिचेतयस्वा॥५०॥इयंतुतस्यानघजायतेंतःशरीरवर्तिन्यतुलाघचिंता॥विपत्प्रभोर्मामतिपापबुद्धे
र्मश्रंस्तस्यायनुषंगजेति॥५१॥राज्ञामयीतःप्रहितेनिमित्तादुपक्रमेसाधुपतिष्ठमानः॥आपृच्छतस्तां
कुशलेनपूर्वंततःपरंधार्विकमेतदाह॥५२॥नस्यात्स्वसुर्मेप्रसवोष्टमःस्त्रीत्येवंविकल्पेनविकंपितो
सौ॥नसाधुदृष्टंनयतेस्यतत्वंदिष्टोहमाशिप्तमिवाप्तवाचा॥५३॥प्रियंवदास्तस्यतमःप्रधानाःसंमो
दिरेरंप्रदराःपरेषां॥तकूषुसम्यग्वदसेभुवंहिन्यमारुतकन्यांतमयेवशोरिः॥५४॥विप्रोदिरेतत्रनकेवि
दिव्यंगताइवांतःकरणेनृपस्य॥खलाःपरानर्थपथैःस्वसाध्यमारोढुमिच्छंत्यतटैरिवाद्रिं॥५५॥सर्वत्र
संसर्गपदैःकुतर्कैश्चिंतानुरागाणांसमुदाचरंतो॥इत्यभ्युसंपातनिरुद्धकंठस्तूष्णींततोमांव्यसृजत्सशंकः
॥५६॥स्वजीवितादप्यधिकानुरागात्तनाथतेमद्विभवस्यसाधुः॥इतिक्षणंतत्प्रणिधानधीरःशुशोचनंद
करुणायमानः॥५७॥श्रुत्वापिकंसभयाकुलत्वंनितांतमाद्रियतेरोहिणेयः॥संभावितापन्नतथाय
थोक्ताकरोतिसाबंधुमभिन्नदुःखं॥५८॥अद्यापिसंक्रामतिभीःपरस्मादतीतवात्स्यमयिनामतातं॥
इतीरयन्नेवरुषाबलोभूद्रागेणसंभिन्नशरीरवर्णः॥५९॥आपृच्छतस्तंभुजमाहतोरुंददृश्यतेस्माध
रमीरिताभ्रुः॥तथागतोसौशुभतिमांसाक्षाद्रोरोद्रइवांगवद्भः॥६०॥निमित्तयोगश्चकृपेसतावत्क
ष्टापिधैर्यस्यविपर्ययाया॥नकेलिमात्रेणभयोःस्वभावादेकंबभूवात्मगुणोदयोपि॥६१॥नभर्तुरर्थेज
नयेत्प्रकोपंमेष्यन्कलतीवसमीस्यमाणः॥यद्वत्तमःकालविदांपुरस्तोरामंजगादोपवदिष्यमाणः॥६२॥
उद्दोदुमुर्वीपरिमृष्यसित्वंदहेस्त्रिलोकीमपितेजसेमां॥त्वत्कोपकालंचनलक्षयेहंशोभंगतस्त्वंकिमकां
यंकोपहर्षोजयतःपुरस्तात्कथंसभूयोविजिगीषतेन्यं॥अतीतसाम्यात्परतोपिमन्येपराजयंतस्यविक
त्यनीयो॥६४॥स्वान्येवकूलानिघनागमेनप्रकोपिताव्यादरतिस्मवंत्यः॥नरोन्वयंतेचमलीमसस्वादिस्थंहि
तंसोभधतामशक्यं॥६५॥अपिस्फुरंतेरुषभामदांधारोधांसिचेतीस्थामुरवैर्विषाणैः॥तेषांमुरवान्येधरज

स्वलानिन्यथागतंतु प्रवहंतिनघ॥६६॥कालंकमप्यागमयस्वतावन्मास्मक्षुभत्यामनुकेशवोपि॥संकर्ष-
णस्वंपितरंकिमेकंप्रत्युद्दरिष्यस्यखिलंकुलंनः॥६७॥शोभात्समंद्वावुपरेमनुस्तो बिंबानुबिंबाविवतस्यवा
चा॥अप्यप्रियेणोपधरिष्यमाणोनवंध्यकामःखलुतद्विधेषु॥६८॥नंदोपधृत्यामनसोविकारंतदाविनिन्ये
स्वमुदारसत्त्वः॥ततोमहाकूलनिपातलोलस्याद्ध्वंसगंगोघइवस्थिरोभूत्॥६९॥स्वंचापयज्ञंयजतीतिरा
जादेशप्रधानानिकिलाप्रुहावा॥आभ्यांचनिह्नूयतेसहेतिजिज्ञासमानेतमुवाचतुर्यः॥७०॥विरोधसंध्यो
रनयावहत्याउग्रस्यराज्ञोऽप्रतिपत्तिमूढः॥मूर्छायमानश्चिरलंबसंज्ञोनंदःकथंचिद्दृतेस्मवाचि॥७१॥
यावुन्मुदंगोद्दृषमाह्वयेतेपराक्रमेतेस्वबलानपेक्षौ॥सघस्तयोराजसभावतारंनेवानुजिज्ञासतिमेत
रात्मा॥७२॥नानानयोरात्महठक्रियाणामात्मेच्छयाविक्रममाणयोश्चनवत्सयोरोपयिकंसमीक्षेत
राजशार्दूलसदःप्रवेष्टुं॥७३॥प्रतीपवार्तास्वपिवात्यदर्पादमर्षणोदोषगुणानभिज्ञौ॥निदर्शनंचाद्यग-
तोभवापिद्विषांकुतःसीम्निनिनीषसित्वां॥७४॥त्वमेवसंदेशमिहात्यशोरेस्तक्रोपितस्यान्यविधोन
दृष्टः॥योज्यायसासंवरतेनवाचातस्योन्मुखीश्रीरपिरुद्धमार्गा॥७५॥सत्यापयामिद्विगुणांप्रदेयं
सांवत्सरंभोजपतेर्विनेष्ये॥इत्थंभयान्मोचयुवीरगोष्ठमर्थप्रसाध्याहिनृपाभवंति॥७६॥उपह्वये
तक्षितिपःक्षितीशांस्तेचास्ययागंगणशःसमेताः॥तस्मिन्किमन्यैरगतैर्गतैर्वातस्मादसाध्यंतव
नेदमर्थैः॥७७॥अप्यस्यवक्तुःप्रतिशब्दयोगादभूदिरेवास्मुगतामराच्चाः॥सयादवस्तुव्यदिशत्त-
स्मिंस्तेऽनोद्यजानीतकुमारयोर्यः॥७८॥जिहीर्षमाणावपिलोकशल्यंगुरोर्नवामंजगतुःकुमारौ॥
हिंप्रविष्टावितोतदानीमक्रूरमेवेष्टमधादयेतां॥७९॥योन्यैर्गतांनापवदेतनीतिंनैवापदस्तंपरिमोह
यंते॥क्रियानुबंधाःप्रथमंविकल्प्याःपंथाहिभव्यान्युपतिष्ठतेसौ॥८०॥कोपंकरिष्यंतमपिस्वदोषा
त्प्रकोपयेन्नस्वयमीशितारं॥न्याय्यात्पथोह्यस्खलितेप्रहर्तासर्वावाच्योभवतीहलोके॥८१॥दोषे-

न्यतोभाविनिसंशयस्येस्वतोबुधस्तद्विधमाहरेत्कः॥नाज्ञानुकूलप्रतिकूलभावात्परंप्रभोरागरुषोर्नि
दानं॥८२॥समंनृपैरेवरुपायतेतेदिदृक्षतमूचगुणप्रतीतौ॥अल्पेपिकंसस्यकृतव्यलीकंसंज्ञास्यते-
त्वांशरणागतंकः॥८३॥अज्ञाप्रियाणांनहिपार्थिवानामाज्ञातिगोर्थैःप्रतिनंदनाय॥बिभेषिचेदोग्य-
मपेक्ष्यकंसान्दृष्टेमनंतेनस्यकिमत्रदुर्गं॥८४॥आराद्उपस्थातुमतोहसित्वंतस्यप्रसादेनचसंगसीष्ठाः
माभूद्दिशंकाचकुमारयोस्तेययोःप्रभावंमुनिराहगर्गः॥८५॥एवंचिरेणव्यतिजल्पतोसाविचारनि
द्राविदुषोर्बभूव॥यस्यांगुरोर्विप्रतिपत्तिशंकाभाभ्रोर्जयेनार्थवतोर्थरंसीत्॥८६॥श्रुत्वाजनन्योव
रुरुद्धयाभांत्यकृतक्षणाद्वेशमगाहिवार्ता॥तांन्यायशुद्धायतिभिर्गिलत्वान्नशोकेनुबद्धधृतीविहं-
तुं॥८७॥धीरप्रसूवंशनिसर्गधैर्याशमंस्यमातानतथाचकंपे॥यथापुरासुप्ररतिस्तदानींकुलांगना
राजकरप्रदानां॥८८॥विलोचनांभोभिरुदग्रदृष्टिःप्रस्नाबयंतीस्तनशैलशृंगं॥शशासमातापरि-
रब्धरुद्धंमेघायमानेवतपात्ययश्री॥८९॥शुश्रूषमाणोभयमद्दवांसिश्रुत्वायथाकालमथानुति
ष्ठेः॥इहस्थितायेननवेवियोगेसंजानतीत्वांधृतिमाहरिष्यन्॥९०॥तत्पूर्वभाधान्नगराभिषेषुत्वपाह-
भावीनिकुलूहला॥तान्येवरुत्वाविवराणिपौराःप्रलंभनंग्रामजनान्नयंति॥९१॥प्रायोमदाःसंतिपुरे
गजेंद्राःताभ्यंचयन्नवत्सपथिक्रमेथाः॥विशेषतोहस्तिपकेरुपेतान्नान्यानिपिप्रत्यधिकुर्वतेतो॥
॥९२॥सभागतोभूपतिनानुयुक्तःस्वयंनतावद्विकुरुष्वेवार्ता॥रामंपुरस्तात्प्रतिपालयेस्त्वंसभ्यानंत
धाविजुगुप्सिपेरन्॥९३॥आह्वास्यतेत्वांबलवाननेकोराज्ञःपुरस्त्वंभवबद्धमौनः॥संघर्षमुग्रंजनयंति
धाराःसेर्ष्याभूपाःसंतिचकत्यनेषु॥९४॥माभ्रातराशेषुविलंबितोभूर्याविष्यसेतातमलज्जयेति॥वा-
ष्पायमाणाधिकसन्नकंठीभूयःपरिष्वक्तसुताःररामा॥९५॥मिथःसमेतायिरहाभ्रयाशंपरस्परस्य
व्यतिरीपयंत्यः॥निराम्यगोप्यःस्महरेःप्रवासंप्रेमस्वभावादितिमंत्रयंते॥९६॥रूपंहरेःपीतमुरीर्ण

रागान्मात्राधिकंसद्यइवोद्धिरद्भिः॥जालांतरश्रीर्भविनापुरस्यश्यामानावनिताकटाक्षैः॥९७॥नोद्यत्-
मानाः स्खलितालकांतानुदंजनस्फारितपक्ष्मलाक्ष्यः॥कामंहरिष्यंतिपुरस्त्रियस्तंधातायनालोकविशे
षदृश्याः॥९८॥पुरोपतिश्चेतइमामुकुंदरहःप्रयुक्तामकरध्वजेन॥पंकद्रुदेविकृदवेषतासांमास्तंभिरागे
किलकिंचितानां॥९९॥भ्रुकुंशवेषेणविकृत्यचेनमर्मज्ञहृतीजनितप्रवेशां॥किशोरभावात्सुकुमारगात्रं-
स्तोस्यंत्यलस्यंकिलहर्म्यनार्यः॥१००॥कुब्जापिसेरंध्रयवनीवनीपतेःसासंयछतेयावदनेनयभ्रा॥अत
परानास्तिविडंबनान्याविडंबनांपश्यतिनेषकामी॥१०१॥स्वयंधरेबंधुजनैःप्रयुक्तांमाजातुधन्यामुपयं
स्तवाला॥विछोरिवस्त्रीरनिधेस्तनूजामंकंगतामात्मनएवकृष्णः॥१०२॥सभ्रूविकारस्मितदृष्टिवक्रंहरेः
मीक्ष्यस्खलितांगनीवीः॥तामाथुरीणामथसज्यधन्वासाध्वीःपराजेष्यतएषकामः॥१०३॥पुरस्त्रभावाधि
कविभ्रमाणांतासांगुणैःश्रृंखलितोमुकुंदः॥कथंचिकुत्यपवर्त्तनायेत्येवंकृतःपश्यतिनास्यमाता॥१०४॥यो
राजहृतःसमुपागतोयमंत्रंपुरस्कृत्यतदीयमेव॥रामान्युतोयत्प्रहिणोतिनंदःस्वयंसमभ्युत्पतेतदंगे
॥१०५॥इत्थंतत्तद्विमतविषयोत्प्रेक्षणीनामधेर्यात्साभूद्रात्रियुगपदखिलानंदसंहारगुर्वी॥यत्रौत्सुक्यप्रथि
तमदनस्तेनवल्यूयतालंसंभोगोपिप्रजमृगदृशांविप्रलंभायभानः॥१०६॥ ॥इतिश्रीमहाराजदेवामि
हाज्ञानुवर्तिनःकविपंडितापरनाम्नोमोहनभट्टस्यकृतावानंदांकेपद्मसमुच्चयेकंसवधेमहाका
व्येषोडशःसर्गः॥ ॥समाप्तापदव्यवस्था॥ ॥अथलक्षारार्थाः॥ ॥श्रीगोपालजय॥ ॥उभये
षुरीक्षितसमस्तविधिषुविनियोजितानुगः॥स्वस्तनगमनपरोरजनींसनिनायमंदशयनांप्रजेश्व
रः॥१॥विममर्शकृत्यमखिलंसतदवसरकांक्षितंकृती॥त्रेषविमृगितगतिबद्धभिर्मथुरामहोत्सवविशे
षकौतुकात्॥२॥अधरेधुरेवकथितायनृपतिबलयेयथायथं॥संग्रहविधिषुकियानभवन्नबभूववेत्यनु
ग्रहंविमृग्यतां॥३॥नविलंबितक्रममकार्षमपिचनकरोमिनिर्गुणं॥वेनसिभजभृतिमोपयिकंननुसर्वमेव

विधिवत्करोम्यहं॥४॥पुरुषानहंतुसमहार्षमनुपदविनेतुमीप्सितान्भारगुरुषुचयुनाम्निदृषानुशकटेघहन्व
रमभ्रयायिषु॥५॥इतिपूर्वकालविषयेषुपृथगभिमतेषुवस्तुषु॥कर्मकरसदसिशुश्रुविरेसचिवानुयोगे
समनंतराशिरः॥६॥ ॥चतुर्भिःकालापकं॥धनुरुत्सवाहृतमनोभिरथहरिवियोगकातरैः॥स्त्रीशि
शुजरद्धिरैर्गणशःस्वयमन्वितोव्रजपतिर्विनिर्ययौ॥७॥अपरोयदिक्षिपतिकालमथसरविधिर्गमि
ष्यतां॥अभ्यवहरकमपीतिबलात्प्रयमाशितःस्वरुचयेयशोदया॥८॥प्रकृतंमुहूर्तमतिवाह्ययदि
हरिरितःप्रतिष्ठते॥धेहिधृतिमितिनिगृह्यहृदयंप्रियाभिरनुभूतदर्शनः॥९॥अतिवल्लभेषुमृगपक्षि
विटपिषुचिरंविलंबितः॥चिंतमजननिमयेवसहत्वभिमानितिप्रणिहितेषुभूयसा॥१०॥स्वजनैःपुरेवि
चरितासिपरसदसिमारमविश्वसीः॥नश्रमममनुभवकांचिदितिप्रतिशासनैर्गुरुजनस्यसंभृतः॥११॥
अगमिष्यताव्रजजनेनकथमपिविसर्जितोहरिः॥हृष्टसहचरसरथःसबलोरथमारुरोहनृपहूतसा
रथिः॥१२॥हरतःश्वफल्कतनयस्यबलिवदसुराधिपायतो॥चित्तमहतविदुषोनुशयःकहिवत्सलत्व
मशिवंनपश्यति॥१३॥प्रणिधानसंहृतसमस्तकरणाविषयेपिसारथौ॥साधुहरिभिरुदवाहिरथोगत
पूर्वमाथुरपथानुसारिभिः॥१४॥व्यतिलंघ्यमानगतपूर्ववनविषयदर्शनोन्मनः॥संकथयतिसमिथः
स्मगणोरथिनांविकासितविलोलचक्षुषां॥१५॥स्मरसीहकृष्णपुरएत्यतरुषुपरिहासनिकृतः॥भ्रमतिव
वनपरोपिगणोविभजत्यभीष्टमथदर्शयिष्यसो॥१६॥स्मरसित्वमत्रयजमानसदसिविफलान्मया
वनः॥तद्युवतिभिरवधूयपतीन्यदपूज्यथाःसहचरैः॥१७॥स्मरसित्वमत्रयजमानसदसिविफलान्म
यावनः॥तद्युवतिभिरवधूयपतीन्यदपूज्यथाःसहचरैःसमंहरैः॥१८॥बलहृतःपरिगृहीततरुषुसुख
ओत्रदुस्तरैः॥वोस्तिभुजविचेयतयातवकृष्णभागमुपयोस्यतेस्वकं॥१९॥इहबुध्यसेबलफलानिसहचर
गणोविचेष्यति॥तानिमृगजवजयल्लहतामुपपादितानिचहरिर्हरिष्यति॥२०॥स्मरसिध्यतन्महिस

मेव्यविपणिमिह कुहकशीलया॥ तत्र चिरमृगितमेव भवान् वनवस्तु विन्यमयत स्वमोदकैः॥२०॥ स्मरथ
हृदयमकुर्मथनमृगपरिग्रहरुचिं॥ तं भयचपलमरुंधहरिमुरुलीकलस्वनविधेयतां गतं॥२१॥ त्व
रसीह संप्रति मुकुंद यदसुकृतचोरविभ्रमं॥ त्वां भुविकुलमुपरोत्स्यति न स्वमगाद्गंकपिवडुल्कमि
व्यसि॥२२॥ स्वयमेव रक्षजितमनास्त्वमसहनवधूजनागसा॥ यत्र निवससि मुकुंदपुरातदिदं पदं गि
रिनिकुंजलक्षणं॥२३॥ जननीमिहैव च पुराहमपितव पदानुगोऽवसं नेशमृगभयचलस्य च मे धृ
तयेस्थितोऽद्युनभवानजागरीत्॥२४॥ इह कंदरेतिपरिमुह्यवयमसुरवाहसोदरां॥ आविविशिमवि
निहत्य च तं भवता स्मकेशव पुरोऽक्रियामहो॥२५॥ परिमुक्तपूर्वविषयेषु सहचरनिदर्शितेष्वपि॥ अग्र
जवधरिपुवद्दुरुपोहृदयं बलस्य न ससंजमानिनः॥२६॥ सकिल स्मचिंतयति कर्हि वहति ममनिष्ट
तिं मनः॥ कर्हि जगदनुभविष्यति मद्भुजदंडवीर्यहतशोकशल्यतां॥२७॥ पितरौ कदा ममदुरंतमरिभि
यमिरंतरिष्यतः॥ अप्यविनयचरितेन कदास्वजनापदेशादिति जोनुतप्यते॥२८॥ हरिष्यमर्षच
पलेन धृतिमपचकर्षचेतसा॥ ग्राहयितुमभिलषन् जगतापरिपाकचारुनिजजन्मनः फलं॥२९॥
प्रथयांबभूव सुबलाय हृदयगतमात्मनो हरिः॥ ऊर्मिगुरुमिव निजोत्सुकतां धृतये परीप्सुरुभया
भयस्थिरां॥३०॥ सहजा मम प्रकृतिरेव सुबल कथयामि ते पुरः॥ साधुरसुजन इति हितयं मम संम
तं सुहृदमित्रलक्षणं॥३१॥ तदयं जगत्त्रयविरुद्धचरित इति शत्रुरेव मे॥ भोजपतिरनपराधपरोप्यथ
वापराधमपि नात्यमाचरत्॥३२॥ प्रसवस्वसुः सकलमेव सकिल बलभद्रपूर्वजं॥ निर्दयमधरजया
बलया सह घातयन्नपि विरंन विव्यथे॥३३॥ बलमातरौ प्रसविनीच मम मम पिता बलस्य च॥ सोह
मुतबलस्त्रीहभिदाध्यपदेशमात्रमथनास्ति वस्तुतः॥३४॥ अपिनोयथायथमनीत्यजनकजननी

स्वभिष्यते॥ पंचसु सदृशितरापितृतेत्यथकोऽप्रथीति मम नाहितं नृपं॥३५॥ मलसंपदेव मुकुरस्य जगति
रिपुमत्तयांकितं॥ स्वस्य वपुरपि न मा रिष्यदिक्कनुदर्शनीयमुखता ऽस्य जायते॥३६॥ निजघान मातुल
मुपेत्य मृगयुरिव सन्निमंत्रितः॥ मा स्म भवदिति कलंकपदं न तु तेन संप्रति मनः शमाय मे॥३७॥ मृग
येततः किमपितस्य नवमपकृतांतरं मयि॥ लोकविदितमपदिश्य च यत्पितुरप्यनिष्टमरिसुराम्य
हो॥३८॥ अथवापुरापुरगतोहमविनयमनेकशोभजे॥ यावदसुरसचिवः सतमः प्रकृतिर्भवत्यवि
तरामममर्षणः॥३९॥ ममवाप्यभिव्यनभियोऽयमपकृतमपि प्रथिष्यते॥ उग्रमथमथिनृपस्य रु
षा चरितं जनः सहितिनातु मंस्यते॥४०॥ भुवनापवादहतमेव भुवनगदमुद्धरामि चेत्॥ मामयमप
वदितानजनोजनकांततवहि जनस्य साधुता॥४१॥ शृणु मोयथासवसुदेवतनयपरिवर्तमूहते॥ तत्र य
दिमथितदीयतयातमनागसं खलसखोभियोऽस्यते॥४२॥ अभिशंसनं तवतथेति बलजनथिता
प्रतीछति॥ किं समयिसति कुरुते स्य भवानितितं वदानिसेत्यकोपयन्॥४३॥ न पराभियोगविषय
पि मम निगदितं न शोभते॥ सज्जनविपदि हि दूरमपि स्वनिमित्तभावमनघो न मृष्यते॥४४॥ शृणुमः
श्वएव भविता स्य धनुरुपपदो महोत्सवः॥ मंचगतनृपतिजानपदं सहितावयं तमवलोकितास्म
हो॥४५॥ अपतातमेव विषरामपुर इति मनोगतं मनो मम॥ हीनमतिशिशयिषोरपि यदुरुसन्निधौ
भवति तेजसो वधः॥४६॥ अथ यूयमानृपसमक्षविषयमवरेध्वनोदले॥ संगतनृपदयितपुगिरं
शिविरात्करिष्यथ नृपापवादिनीं॥४७॥ रजनीषु दृदृशिमासु विवशाकरणाः स्वनिश्चया॥ सारि
भयपितृकयाश्रवणश्रथितेहियं किल बलं समभ्यधाः॥४८॥ वयसो भविष्यति परस्य मम हिश
रदांगणो स्ययत्॥ व्यंजनसमुदयनादवरंतवतत्रपेतृकरिपुर्मथिष्यते॥४९॥ अथ सावनस्य सम
तीतभवदितरहोयनस्य वा॥ तं बलपरिभविता स्म्यवरदेशरात्रएवशाशिनः पुनर्भवितृ॥५०॥ तत

रवतस्यचसेदृशेपरेभ्रेमुभयंभविष्यति॥त्वंगुरुजनाथितुरंकसुरवंपुनराकुकस्यचजनोविगा
हिता॥५१॥प्रियवादिनांधुरिगतश्चसदृशामवदद्दलोपिते॥आत्थयदिदमचलोद्धरणत्वयिसर्व
मच्युततदस्तिसंगतं॥५२॥अयमन्वभूत्कलुषमेवजननमधिकृत्यकेवलं॥आमरणमथपुरोपि
तथानियतंचरिष्यतिनसंशयोस्तिमे॥५३॥स्वसृजोघितोपिममृत्युरितिहृषउभंतरानहन्॥
सममभुहितुप्रसवंनिजघानहप्रकृतयेवशंकया॥५४॥प्रसवोष्टमःपुनरभून्नसहिवुकिमुदरे-
ष्वलीयता॥भीतइवनरपतेरथवासहसातडिद्दुदितास्तिरोदधे॥५५॥अपुराणजन्मसुचशश्वदरिभ
यमधत्तशंकया॥राश्वदमनुजवचःश्रवणादधृतिश्चकारचमहीमनर्भकां॥५६॥इतिसर्वमस्यफल
शून्यमभवदघमात्रवर्द्धनं॥यत्रजयतिविधिनाविहितःसभवानकृत्रिमरिपुर्दुरात्मनः॥५७॥सह
रभधानुरवनिष्टगतशरदिगव्यमित्यंगं॥विश्वहितमितिपरामपितामरिमुद्धरन्नतिशिवांकरिष्य-
ति॥५८॥किमचेतसःप्रलपथेतियदिवइतरोभियोह्यतो॥स्वामभिदमखिलमुक्तमितिव्यपदेशम
व्यथितयाकरिष्यथ॥५९॥अथवालमित्थमपरिश्यथदितुभवतोभ्यभूत्परः॥तंतदनुपदमकार्यमहं
प्रतलप्रहारसमकालजीवितं॥६०॥कतरंत्वमाह्वयसिदातुमथकतमभाशयिष्यसि॥पूजयसिकिमि
तिवस्थयवाजनमप्रसक्तमपिलिप्सवोयथा॥६१॥हरिसंविदाउर्चयसिकुब्जमपिकुसुमचंदनेनयः
यातिसदिषमितिवाभिमतानुपलोभयिष्यथविशेषतःस्त्रियः॥६२॥कलहायसंविदबलाभिरिह
परपरिग्रहैःसमं॥तानियतमुपचरंतिपुनःप्रियवस्तुनाप्यकृपयकठिनादिगागतां॥६३॥भवदीरितं
यदिकरोतिनगरविषयःकृतांजनः॥तंसुरइवविशिनष्मिफलैरितरप्ररोचननिमित्तमद्भुतैः॥६४॥य
दिपूजयेन्नभवदुक्तमगुरुणिपदेपिदुर्मदः॥तंनृपइवदमयेयलपुरस्पृहयामिमृत्युरिव संहरेयवा॥

॥६५॥विमनीकरिष्यथसमेत्यनगरमितिदुःक्रियाशतैः॥सिद्धिषुविहरतपूयमथोपुरिविग्रहेविहमितिव्य
वस्थितं॥६६॥सुलभोदयंमुनिपुतावदपिचकलिमाहरिष्यथ॥यावदलमपचरापचरेत्यभयाःपुरेपचरिताः
स्यहेलया॥६७॥तदकार्यमनेत्यलमुदीर्यदिशमपिनयस्यगिमा॥इत्यधिकृतपुरुषाभिहिताःस्वमपकृवी
ध्वमपरोक्षसाहसं॥६८॥अचिराद्भविष्यतिनृपोयमभिभवपरःक्रुधायदि॥शैलनिरसनसहंभुजयोरथ
दर्शयिष्यतिजनोयमूर्जितं॥६९॥इतिवर्णितंसहचरोपितदभिमतमभ्यपूजयत्॥नर्मपदकृपिदशांरवन
लुतद्दुपैवभिन्नमपृथग्घनःकुलं॥७०॥प्रसितासुयंतृबलशेषमतिषुभुगमर्षकोतुकैः॥वर्त्मनितदुर्दितमुन्म
नसास्फुटमभ्यगाहतरहस्यमंत्रतां॥७१॥इतरोजनःसपुरसीमिनृपतिविदितोन्यविक्षता॥यावदनवहित
यंतृयशःसरयस्तथागतरथीचिराद्यथो॥७२॥हरिणानुरक्तजनमात्रशुगपहरणैकधर्मिणा॥यंमुरजनि
पथिशोकमयप्रणिधानएनिजतत्वदर्शनां॥७३॥अथतेनसंहृततमाश्वपुनरुदितबाह्यदर्शनः॥प्रत्ययधृ
तिमुदितःशिबिरेरथिनोविसृज्यसमगंस्तःभूभुजा॥७४॥बहुशःसमाहृतवतोपिधृतिरभवदागतेहरौ
ध्वरवलुनरपतेरपरंसहितन्नियोधनपराखिलोद्यमः॥७५॥प्रथमंनियोध्यभुजयुद्धकुशलजनमुद्धनेहन
नि॥चापमथमहयितानृपइत्यधिपःस्वसंविदमघोषयत्पुरे॥अधिरंगमेवजनदृत्तिरुषसिदृशेपरस्परे
स्वमदृशिरवलुयथारजनीपरमार्यतोपिपुतथेवतत्रसा॥७७॥कृतमंचभक्तिसपताकमगुरुभवधूपवासि
तं॥गंधजलराशिमितरेणुलसन्नृपपौरजानपदसंगमाचितं॥७८॥अतिविस्तृतायतमुपोढदृतिसममनेक
रक्षकं॥रंगपदपदमतितरामरुचन्नृपसंमतैकसुलभप्रवेशनं॥७९॥ ॥युग्मं॥प्रतिहारवच्चतदुपास्त
सकुवलयशेखरोगजः॥योसहनपरिभवंतमपिस्वजनंपरस्यतुरुरोजशिक्षया॥८०॥सवितानकुसुमपि
ष्टपदमुक्षिपधर्मधारणं॥भोजपतिरथतदध्यगमद्दुंदुभिप्रभृतिपूर्वलक्षणं॥८१॥अथतेपसन्नि
धिपदेचबलगुरुरभूत्कलभवान्॥अस्ववशगतिरकारिसहिस्तिपेनपुत्रपरिवर्तशंकिना॥८२॥नहरे

रुतांप्रभुजयुद्विधिमतिशयीतभूस्थितिः॥इत्यवधृतमतिरेषनृपःपितरौबलस्यकिलरंगमानयत्॥८३॥महि
तोयथौग्रजजनश्चनृपजनरुताध्वदर्शनः॥रंगपदमपरयेवदिशाबलकेशवौसहगणेनचान्यथा॥८४॥सन्
कुलगणश्चलचलेतिहरिसुबलसंविदंगतः॥मत्तकुलसमप्रसरोडुरतिक्रमःसमभवत्पुरोकसां॥८५॥अप
रातिसृष्टमुपयुंधमनुपधिनिरुंध्वमध्वनः॥ध्वमतिपरुषमित्यभितःकलहेधनानिसुहृदोविनेनिरे॥८६॥
कमनीयदर्शनतयाभुवनजयिनावतेजसा॥तत्रबलधरगिरिधरौबकुधानरुतागसावपिजनोव्यलंघ
त॥८७॥अथहृस्यतस्मरजकश्चपुरिनरपतेःपरिग्रहः॥तंनवरुचिरविचित्रशुचीन्यपरंबराणिफलवद्य
याचिरे॥८८॥कतमोत्रवःपरिदधीतनृपतिवसनानिबालिशाः॥गर्हितमिदमितिमंदमतिःसजगादरुष्टस
विधानमर्षणः॥८९॥वसनानिजकुरुखिलानिहरतहरतेतिचापरे॥तंरजकमपरजोहृदयस्तरसाहरिर्जहि
नहीतिचावधीत्॥९०॥अथवायकःपटमयाद्यसमगतसमर्हणायते॥इष्टवरवितरणेनचतंप्रतिचक्रतुः
प्रमनसौबलाच्युतौ॥९१॥प्रतिघप्रसादफलभेदपरिणतगतीकुमारयोः॥तावितरजननिदर्शनतोयथतु
लदारजकवायकावुभौ॥९२॥अथमाल्यकारकनिकेतमनघगमनावुपेयतुः॥कचिदविरतसुखोस्थ
इतिप्रतिपद्यतस्यसचतावुदारधीः॥९३॥वरदोस्त्रगर्हणमुपेत्यसहसखिभिरुत्थितोततः॥कुब्जवपुषम
धिराजपथंमृगगामिनींदृशतुर्वरांगनां॥९४॥यदुवंशनीतिमिवनव्यमनयजविकारमायतीं॥उग्रनृप
तिभयसंकुचितामधिदेवतामिवपुरःशरीरिणीं॥९५॥नगरीश्रियंकुसितमूर्तिहरिसखभियेवसीदतीं॥
दृष्ट्वनरपतिनिदेशगिरंयुवराजशासनिपीडितामिव॥९६॥ ॥विज्ञापके॥अथतांविलोक्यसुबलःस्म
कथयतिहरिंयदृच्छया॥अग्रकरधृतकरोविहसन्नसितांबरस्यसतिकर्णगोचरे॥९७॥ममपश्यदृष्टय
तिविभ्रमियमसितलोचनासखे॥भंगविकृतमसमंदधतीमुखलक्ष्यमाकृतिमनोज्ञतागुणं॥९८॥इदम
स्मरोतिशयिरूपमविबुधपदस्थमीर्ष्यया॥एवमुदरुजदिवैकतमोमरुतांमहोदयनृपात्मजानिभां॥९९॥

तरिमामिहैवभजमूर्तिमहमनुभवेयमर्थयो॥तद्गिरिधरकुरुतांचभयान्नहरिवत्मभावमृषयोहितोविदुः॥१००॥
अपिकालएषयदभोममतिशयसुदीरयेद्भवान्॥त्वांविधिरितिनिकृतोपिजनःप्रतिपूजयेदथमुहूर्ततःपरं
॥१०१॥यदिषाप्रसाद्यमितिकुब्जभजसितथेतिमेमतं॥हस्तगतमसमगंधमिमामनुलेपनंप्रथममर्थये
यने॥२॥अनुलेपनोत्तरविधेयमिदमथमुहूर्ततःपरं॥त्वंस्मकुरुममहरोभिमतंकृतिनःस्वशक्तिसदृशप्र
तिक्रिया॥३॥तवजन्मनाहिभवतीयमुदितपुरुषोत्तमामही॥श्रीस्मवतरणजामपिसाश्रियमेनया
वहतुकुब्जकामयो॥४॥हलिनातथेत्यनुमतश्चहरिरुतमृदुस्थितोत्तरः॥तांकिलनरपतिवारवधूंहरिया
श्चपरुरुधेपुरोगतः॥५॥अथसापरीत्यहरिमारभ्यदृसमशरपीडितासती॥अहसिनृपकृतमर्षमथोनृ
पतेरिदंत्वमनुलेपनंभजो॥६॥अनुलेपनेनबलपूर्वमनुमतमनोरथास्वयं॥साहरिमुपलिलिपेपुलकैरि
तरेतरप्रथितमन्मथेंगितं॥७॥स्मरचापयष्टिमिवतांसमदनदहनोपतापिनीं॥आर्जवमनयदलंघट
यन्नपदेपदाविधुकमग्रपाणिना॥८॥हरिणापयस्तपरिरंभमलघुजनोघनोन्नतस्तनी॥तत्क्षणमल
भतसाकृतिनीस्फुरिताधराग्रमुखपानरचितं॥९॥अपरेयथासरसिसर्वविकसितसरोजसंभृते॥
तद्वपुषिकिलतथादृदृशुःश्रियमाननप्रकृतियोग्यतांगते॥१०॥हरिगात्रसंक्रमनिमित्तमथरुचिम
होदयायतिः॥इत्युभयविधगुणग्रहणादपरास्तदागडुलतामपूजयन्॥११॥अकृतार्थमन्मथनियो
गविधिमनतिलंघयिष्यती॥साकथयदपरतंभतयाप्रकृतिप्रगल्भसकलेंगितानां॥१२॥वमनिभमंप
रिगतोसिपुरविहरणादवाहनात्॥तन्ममगृहमनुगृह्यसमेमनसःप्रियंकुरुहरेरतिभ्रमां॥१३॥उपरुंधती
बलसमक्षमिनिकिमपिलज्जितोहरिः॥तांकथमपिविसर्जयिरात्मणयाभ्युपेतसमयांतरागमः॥१४॥
रुचिरांबरस्रगनुलेपसमुदितनवप्रसाधनो॥जहृतुरखिलजनस्यमनःसुतरामुभावसितपीतवाससौ
॥१५॥धनुषस्ततोयजनवैश्वयथतुरनिवार्यविक्रमौ॥रक्षकबलनिधनायुधतांहरिभग्नचापशकलेपुन-

स्तयोः॥१६॥ततयोः स्वचापदलनांतमनयमनुबुभुजे नृपः॥मल्लबलदुरवलेपहतः सहतौ निजुद्विधिनाशुभुजौ॥१७॥ब्रजबालमल्लभुजयुद्धमसममिति मंस्तमाजनः॥इत्यभवदलमुदाहरणं नृपतेस्तदीयचरितं तदूर्जितं॥१८॥योगोद्देशविहतचापभंगाद्दौतानंदः परपक्षोवभूव॥मल्लश्लाघाजनिताशस्यताधन्मुख्यकार्यं नृपतेर्वाक्युद्धं १९॥ ॥इतिश्रीमहाराजदर्वासिंहाज्ञानुवर्तिनः कविपंडितापरनाम्नो मोहनभट्टस्य कृतावानंदांकपदसमन्वये महाकाव्यकंसवधे धनुर्भंगानामसप्तदशः सर्गः॥१७॥ ॥श्रीगोपालजय॥ । अन्विष्यंतौ नृपकोपमयलाद्रंगद्वारं बलकृष्णावगातां॥तेनक्रांतं कारिणमथस्थगायं व्यापीडांतं किलनामोत्पलादि॥१॥प्रत्यासन्ने सुबलः स्मप्रगल्भं तत्संदेशं गजयंतारमाह॥दूरं कर्णैर्यदिनागं पुरस्ताद्दृष्टं तेसु प्रविशामहे रंगं॥२॥मोरोलोकः प्रविशत्येव रंगं दंतीचासावनियुक्तो नहंति॥नाम्याय्यं किमकस्माद्धि यमीत्युक्तो नूचे पुनराधीरणं सः॥३॥तत्पूर्वं पिष्यतिषंगे महांतस्तेजः प्रायाः कृतिभिः शंकनीयाः॥अस्तिश्रेयो विपरीतानुबंधा विश्रब्धानां सहसातेषु दृष्टिः॥४॥कीतास्यानां विपदामेष्यतीनां प्रायो रंध्रं भवति स्वल्पमेव॥स्वैरान्वारेप्यनिशं वर्तमानैस्तद्दिंसा परिहर्तव्यमाहुः॥५॥अथ्यापातप्रतनूच्यवलोकेदुर्धरत्वं व्यसनानि भजंति॥इत्थं विद्वानपि कोदूरदर्शी धीर्यो दिग्गानवमानेन यायात्॥६॥इत्युगानां प्रतिकूलं प्रवृत्ताः पश्चात्तापं दधति प्रायशोन्ये॥तद्धर्म्यो हि नयेथानुबंधे क्षिप्तां प्राज्ञाः स्वयमासादयंति॥७॥विभ्रंगाम्यो मतिमद्भिः प्रयातं मार्गो यास्यत्यनुगंतापहृनां॥अथ्यास्वर्थं यदि पारोपि भूत्वा वेधयानां प्रतिपद्येतवर्त्म॥८॥एवं वादीजगदेनागयंत्रावाचोयुक्तिग्रहणामर्षणेन॥त्वं बालापि स्थविरेणात्यतुल्यं भीयेतुभ्यं शुकवत्तन्वतेगां॥९॥गर्भे मातुः स्थितएवाधुनासिध्यासंवाचां पुनरर्थकरोषि॥तन्मध्ये हं वदतां पंडितानां ध्यारव्यावर्णनिगदानग्रहीस्वं॥१०॥अर्थज्ञानव्यतिरेकेण शब्दाः संस्कारेणाप्युपपन्नान्भांति॥रत्नाकल्यान्नृपतेरवशो भापुष्यं त्वंगेनपुभर्वानिरस्या॥११॥अन्यार्थास्त्रप्रहतस्वांगकल्याः स्वैरान्वारेगमिताविप्रलापं विश्वाद्वादानपु

धादर्शयंतस्तत्वेनाहोवक्रधाशुप्रथंती॥१२॥न्यायः पंथायदभिव्याहृतोयं सध्याघातोवदतस्वामुपैति॥नीचःपूज्यं यदशिष्यं प्रशिष्यात्तद्दिंसोनतरां मर्षयंति॥१३॥रंध्राशंकीनपथुलंघसेयः सत्रागत्यमुमपाश्चेतनोपि॥दोषज्ञत्वं भवनोवाच्यमत्रत्वन्नेतारोबलकृष्णोत्रवीमि॥१४॥यांप्रेष्यंतोविभितोयोनहतं दृष्टं तद्दोह्यनलः केनशाम्येत्॥१५॥सोस्मिन्मुक्तायतवाचि प्रगल्भं संरब्धेपि प्रतिवाक्यं दिदेश॥अर्कस्येवद्युतिभर्तुः कदाचिन्नैकास्मीतिस्वगतावुद्विरास्ति॥१६॥कोवक्तव्यं बलभद्रे हरौवालोकेदृश्यन्नमदांधानुगश्चेत्॥भोग्यायुष्वेन्नवसंभावयाभिदृश्यत्वं कंसवितुर्मंडलेकः॥१७॥अप्रत्यक्षे प्रियविश्वामहांतोग्राह्यादेशानविवसंतिवाच्यं॥स्वायोग्यत्वाभ्रपमाणाः परोक्षं निंदारागादपरेवाधमाहुः॥१८॥नेतः श्रोष्यत्ययमित्यंगनोधभाभूरामादपशंकोहरेर्धा॥जानीह्येवं ममतत्वोपदेशात्सद्यस्माकं हृदयस्थोंतरात्मा १९॥अथ्यासेष्योतवतोमन्यसेत्वं शांतंयाभ्यां निदेशानाथ्यवंतः॥न्यस्तंवायत्पदमाभ्यां तदेवन्याय्यं नामप्रतिवादीहकः स्यात्॥२०॥हृतेनेहाज्ज्वलनाधस्यशंकानप्रेशिष्यत्वपुरस्तादितोमां॥यश्चान्वेष्टुं रथितांवायुपुत्रं गुंज्यादेद्रघुनाथेपिवाच्यं॥२१॥शिष्यामज्ञं हितमित्येवधीमानिष्टत्वार्यः सतुकुप्यत्यमुष्मै॥मार्गातीतः स्वयमेवानुयाति स्वैरारागीनपथः शासितारं॥२२॥कष्टातंकेष्विवमग्नाभिषग्भिर्मंदाः सद्भिः परिहार्यास्तथाहि॥तेस्वंवान्यं प्रथयत्यात्मनीनं हेत्वाभासैः प्रतिसंचारयंति॥२३॥मज्जत्स्वापज्जलधौतत्वदानां साधूनां स्यादनुकंपेधदुःखं॥तेतन्माभूद्दलमस्मान्प्रतीति स्वायोग्यत्वं धुतशिक्षावदंति॥२४॥पूर्वः पक्षोयदिनागं व्यपाहस्यतेद्दछींदुतमंतर्विशामा॥रुद्धद्वारे पुनरस्मिन्प्रकोपं कृत्वा किंचिद्विरमित्युत्तरोयं॥२५॥अग्निप्रख्यस्तनुमूलोपिकोपः केनज्ञेयः कतुविश्वाभ्यतीति॥मीमांसेतस्वयमादौ मनीषीपश्चात्तापं प्रतिपाश्चात्यबुद्धिः॥२६॥क्षेमाक्षेमोशामकोपानुबंधोपंथानोद्दोपृथगादेशितोतो॥यस्तत्कांतस्तत्तरणे प्रयाहि प्राज्ञोत्रिवेवयमेतत्प्रजामः॥२७॥इत्याकोप्यद्विषयतारमुच्चैः कृत्वेवार्थं सुबलः प्राप्तहर्षः॥हर्षाकारस्फुटसंधानभंगा

प्रीत्युद्यातंगणमभ्यासासादा॥२८॥तावच्चांतर्भृशमाधोरणस्यक्रोधःकक्षज्वलनाभोदिदीपे॥सद्यःशिक्षा
विधिनातस्यतस्मिन्संक्रांतोभूदखिलःकुंजरेत्वा॥२९॥प्रास्थन्नुच्चैःकरमाधूतभूधरखेभ्योमुंचन्मदधारि
प्रवाहान्॥क्रुद्धःक्रुध्यद्यमदूतप्रकाशःसोप्यन्याभोदृश्यनागराजः॥३०॥उग्ररूपंकरिणःकोपसृष्टंद्वैधी
भावंविदधेतज्जनेषु॥रंगस्यांतर्दुरवापंबहिस्थैरंगस्थानांबहिरेवातिदुर्गा॥३१॥तत्संक्षोभंजनसंराव
लक्ष्यंनिभ्येराजाश्रुतमप्यश्रुतत्वा॥दध्योद्यनंसचिरादेवकालंयस्मिन्कोप्यःसकरीपर्यकल्पि॥३२॥ना
गक्षोभप्रतिशंकापसर्पत्योरक्रांतव्यक्तावकाशाः॥लिप्साःसाईंकरिणायुद्धलीलांकृष्णस्यालंसंभुभूवा
निदेशः॥३३॥कदापातंद्विपमुद्दीक्ष्यतावत्प्रत्युप्यंतंसुबलस्यापिबुद्धिः॥पश्चात्तापंपरिचक्रामसकिंवि
द्ध्यर्थयंत्राविरहीतंमयेति॥३४॥नागेशोरिद्विषणज्ञानभाजांप्राणज्ञानामिभराजस्यकृष्णे॥अन्योन्य
स्मिन्नुभयोस्तुप्रजज्ञेतस्मिन्काले निहतप्रायबुद्धिः॥३५॥मूर्ध्नाभिघादभिशेलंमुकुंदोनागंचालंनिह
निष्यत्यखेदः॥एंशोदंतीहरिणाद्दयुद्धंनातिक्रामेदितिसंभावयामि॥३६॥चिंताशल्यंहृदयस्थंहरिष्य
त्येषोस्माकंबलवत्तर्कयामः॥उत्प्रेक्षेयन्मथितेभंनतंचश्रूयांजीव्याश्चिरमित्यागताश्रुः॥३७॥माभू
तोत्काःसमयोयत्रगृह्यप्रत्यासीमद्यपयानाध्वभागान्॥क्षिप्तस्थंमेबलवत्प्रत्यनीकासिध्येद्दाहव
लीलाच्युतस्य॥३८॥इत्यन्योन्यंपृथगन्वर्थरम्यैरात्मज्ञानांमुदितैःपार्श्वगानां॥शिक्षायोगेरिधयंतुर्ग
जेंद्रःकृष्णोमर्षंपुनरुक्तंप्रपेदे॥३९॥ ।कालापकं॥तालाहूतंकरिणंवंचयित्वासव्यासव्यंक्रमणेन
वक्रः॥पूर्वापातप्रतिशोकाविधानप्रेक्षारागंजननायास्ततान॥४०॥दुर्दर्शाद्रिप्रतिपक्षंक्षमूर्तेरभंयुद्धंविषमं
केशवस्य॥मिथ्यायत्तप्रतियोधंमुहूर्तादूर्ध्वंचक्षूरतयेलंबभूवा॥४१॥स्थित्वाधीरश्चिरमाहूयनागंसो
पक्रामन्मथतेनानुसस्रे॥शुंडादेर्ध्योन्निर्तिनिर्यांतरत्वात्प्रत्यादित्संसवलतापुष्करेण॥४२॥एकस्यासीद्दुर्ग ॥५०॥
भूयंलघुत्वात्सख्यासव्यंचरतोमंडलानि॥तत्वाकारस्खलितोन्योमदांधःप्रायोध्यासेद्विषतःपर्यणंसी

त्॥४३॥आमूलांतादवनीमग्नदंतंप्रत्याकृष्टंहतपुच्छोमुकुंदः॥उद्वाहित्योधनुषःपंचवर्गंव्युत्क्रांतश्चा
ध्वतरःकुंजरोपि॥४४॥संचस्खालस्वयमुत्थायधावन्दंताकाशस्थितिलस्यप्रदेशे॥उत्तस्थौचाद्विपदंष्ट्रा
भिघातप्रेषात्कृष्णःसहलोकप्रणादैः॥४५॥अप्यात्मानंकृचिदत्यिष्टमध्यंसधोमुंचत्करिणाग्राहयि
त्वा॥सर्वारंभोद्वलमानांगमदाद्दुद्धंथानेस्वयमेवाग्रहस्तौ॥४६॥सर्वारंभैर्वितथैरप्रशांतादीष्यारो
षादधिकंहृद्यमानः॥श्रांतःशौरेरतिमात्रानुसारात्सप्रस्विन्नोविषसादेभराजः॥४७॥हस्तक्षेपेहत
शक्तिंकरींद्रंपुच्छप्रांतेनिगृहीतंकराभ्यां॥अभ्यापन्नंगुरुतामंगसादान्नातिक्लेशंप्रमयामासकृ
ष्णः॥४८॥लीलाप्रायेगजयुद्धावसानेतत्साचिव्यंसुहृदस्तेवितेनुः॥एकाकित्वंनिजमत्याहितस्यप्रा
यःप्रीतोससहायत्वमिष्टं॥४९॥सव्यासव्यभ्रमणक्षीणकस्यप्राणंचेभंसविवाःकेशवस्य॥अत्य
न्योन्यंपरितस्तत्तदंगेस्पृष्ट्वायांतःसहसापर्यभूवन्॥५०॥हस्ताक्षेपारवपात्यैभमुर्व्याभुत्वाताभ्या
मथदंतायुधाभ्यां॥हत्वाध्यस्तैःसहतंरामकृष्णौपौराणामभ्यभिनंद्यावभूतां॥५१॥द्वास्थैरारादभि
तोदत्तमार्गौभीमप्रेक्ष्यौगजदंतायुधौतौ॥मध्यरंगंसधयस्योजनानांगाःशृण्वंतोयययुर्विस्मितानां
॥५२॥वास्यातीतौरविचंद्रप्रकाशौतौद्वौपुत्रौहतशेषौनृपस्य॥आत्मापित्रोरनुभूयेक्षणाभ्यांस्वकु
क्षौरुच्चसितंबद्धमंस्त॥५३॥रामात्कृष्णेतनयत्वप्रकारंमातुःस्नेहंध्यशिषन्नोरसत्वा॥स्वंपूर्वस्याप्य
थवागर्भयोगंदेवीदध्यावभुभूतिंविनापि॥५४॥योस्माभिःप्रागपविद्धःसनालंसद्यायुष्मानियदात्मा
वतेति॥मातापित्रोरुभयोरेषताधश्रागःकृष्णेबलमप्यत्यशेत॥५५॥सागस्काभ्यामसदीशांगताभ्यांतौ
पुत्राभ्यांपितरौविव्यथाते॥गूढस्वाभ्यामिवदेवाद्भजद्भ्यांन्यासस्थानादपिमोलंविनाशं॥५६॥त
स्मिन्कालेवसुदेवादभिन्नःशोकानेदंपिदधावेकहेतुः॥सत्येवंवानुशयोस्याधिकोभूद्यश्चोपेयांससु-
कालीनेभप्रथितेपिप्रसूत्वेकृष्णोदध्यादथपूज्यतिबुद्धिं॥गोपीवन्मय्युपपद्येनमातृप्रीतिर्नास्त्यत्यनुदध्यौ

तः साधुनेति ॥५७॥ जिज्ञासूनामभिरामाविशेषानस्थैर्यायप्रतिचारूच्चरंत्यः॥ कृष्णेगेशतशोशैर्य
थास्वंचक्षुःश्रेरायः कृतीनामाससंजुः ॥५८॥ कर्तुंयस्यप्रियमेकांतरागाद्रोध्यः स्वंस्वंकुलसेतुंध्यतीयुः सो
यंकृष्णः सखिवीक्षस्वदृष्टिंपद्मप्रख्यामितएवप्रयुक्ते ॥५९॥ सर्वस्यैकोजगतः प्राणएष प्राणप्रेमह्यनुपा
लंभयोग्यं ॥ इत्योचित्याविहरंतीभिरस्मिन् घोषस्थाभिः सुकृतंकामिनीभिः ॥६०॥ किंचिच्चक्षुस्तवसंधा
यदृष्ट्यासाईंसख्याहृदयस्थंब्रवीति ॥ तन्मन्येहंसुभगेविस्मितोसोलोकख्यातेतवराधानुरूप्ये ॥६१॥ इ
त्योत्सुक्यात्पुरनार्योमिथःस्वैर्नेत्रैरूपलिलिहुः कशवस्य ॥ लोकोद्गीतादपिचिंतागतादप्यन्यैरन्यैरतिरा
म्यविशेषे ॥६२॥ ॥ कालापकं ॥ ॥ स्वैरंस्वैरंपदमाधेहिधीरत्वद्भक्तेंदुछविमेताः पिबंतु ॥ पूर्णैश्चक्षुश्चषु
कैः पौरवामाइत्याचख्येसखिभिर्वासुदेवः ॥६४॥ शाम्यत्तेजाविशतिस्वैरमीशेकंसोजग्लोसहसामर्षणो
पि ॥ अर्वाङ्मृत्योः स्फुरतिप्रेषजंतुमश्लिष्टचक्षुर्नचवेदागतंतं ॥६५॥ निन्येचैभादवतीर्णाजयाशामल्लस्थाभि
र्निभृताशाभिरेव्यां ॥ दृष्टोपायप्रतिघातेह्यधीरादेवीसिद्धिंमनसारोपयंति ॥६६॥ बालोयूनः कठिनस्याकठो
रश्चाणूरस्याः लघुमूर्तेर्लघीयान् ॥ नालं कृष्णः प्रबभूवाग्रदृष्टोविश्वंदृष्टोनुभवत्यात्मनोधः ॥६७॥ नागोद्दुर्ग
नगहर्तुर्गजारेर्दृष्टशौरेर्वपुषः सोकुमार्यां ॥ मल्लेभ्योलंनचलोकोपिमेनेदृष्टिभ्रांतिंनहितकोपिहंति ॥६८॥ रा
जद्रोहासमयाराजकांतादेत्याबद्धभ्रुकुटीदूषितास्याः ॥ स्वामीशाम्यत्यपराद्धेपिकृष्णेकस्मादस्मानपि
नाहेतिदध्युः ॥६९॥ सन्नाह्येभोन्मथनारस्त्रापक्तिस्याशौरेर्मृत्योर्भुभितेशत्रुपक्षे ॥ भाध्यानीकस्तातिजासूक
प्रवाहावृद्धामात्यैर्दृष्टशौरेरंगभूमिः ॥७०॥ आस्तारंगप्रमितदस्युजातंसंहृत्यास्तेजगदेकः पुरेति ॥ स्वेतद्दिस्था
ऋषयः सन्निदध्युस्तंधातारंप्रतिभालोचनेन ॥७१॥ तत्वंधर्मन्यनुभूतंपुरेस्मादंतंपश्यन्नगुरुहार्दाधिकोपि
कृष्णेराज्ञः कृतनेकापराधभ्याकस्कोधृतिभंगंजगाम ॥७२॥ नंदस्योपक्षितिपेबद्धनर्थैकल्याणांतंगमनं
साच्युतस्य ॥ दैवक्षेमध्यहमन्यभवाच्यः स्यामित्यंतश्चिखिदेगांदिनेयः ॥७३॥ गोप्योदृश्यः कमनीयः प्रहा

स्यः शंक्योयोध्यः प्रतिकार्यः प्रसाध्यः ॥ ध्येयोधंपः पृथगासेदुषामित्यासीद्रंगेहरिणेकामिषत्वं ॥७४॥ कालो
पः संघर्षाग्निररणिबद्धकक्षौचाणूरादीनभितोरामकृष्णौ ॥ द्वंद्वंकृत्वासुहृदोमल्ललीलामुद्यद्धृत्यध्वनिहृष्टा
वभात्कां ॥७५॥ चित्रोपायप्रतिभौमल्लशिक्षामार्काणांगोरजसादर्शयंतौ रंगस्थानामनुरागंजनानां
माजक्रातेनृपमल्लेतराणां ॥७६॥ वादित्राणांप्रतिपिंडेनिनादेनिष्कूजत्वंगमितेचाथरंगे ॥ चाणूरस्तोपृ
थगाभाष्यदर्माद्दित्यवक्त्रप्रभुसंदिष्टसंज्ञः ॥७७॥ अत्यप्राणैर्विजितैः कुंकुमारेरंगश्चायंबलवपुद्दरा
गी ॥ प्रत्यग्रोधांप्रसृतोवीर्यशब्दः संसृज्येथांतद्दिहास्मद्गणेन ॥७८॥ इत्याख्यायोपरतेमल्लवीरेकृ
ष्णोवादीद्दृढतामग्रगण्यः ॥ कालांभोदध्वनिगांभीर्यभाजानादेनारादनुविश्राव्यरंगं ॥७९॥ अभ्यन्या
यः सदसिप्राकृतानांनाभात्यंतेकिमुतोवीश्वराणां ॥ अभ्याह्वातुंक्रमसेस्मानतुल्यान्जातुप्राज्ञो
विदधातीर्थमन्यः ॥८०॥ अभ्यद्दश्यः कथमत्यल्पसारैर्युद्धंबालैः सदृशंत्वद्विधानां ॥ रंगस्थानांकथमं
गाहरिष्यः प्रीतिंवाष्णोरसमेनाहवेना ॥८१॥ धर्मंजह्याः कथमेवंकथंवापापाचारेरमसेत्वंविरेण
त्वामन्यायप्रसृतंवाकथंनोशासत्यार्याः परिषद्धर्मगोपाः ॥८२॥ अस्तिप्राचांपथिनस्यास्यतीहेम
ल्लोभूत्वाभुविनश्रद्धेह्यः ॥ नाहंमर्षेसमितौकिंकिलत्वंपातादूर्ध्वंनिहनिष्यस्यनेकं ॥८३॥ दोर्भ्यांयुद्धं
बलपर्यवणांतंप्राणद्रोहीनृपतेस्तत्रदंड्यः ॥ अन्वघास्यत्कृतमस्त्वांविनेवं सत्यंचेन्मामनुमन्येतलो
कः ॥८४॥ युध्येयाहंभवतेत्यस्मदीयोनात्माधर्मप्रणयीकामयेत ॥ इच्छामोंगस्वकुलेस्मद्दिदृक्षांपो
रस्त्रीत्येजयलक्ष्मींभजेथाः ॥८५॥ इत्याख्यातेहरिणासाधुवादः सर्वेषामभ्युदियायाननेभ्यः ॥ नान्वी
युस्तेनृपतेर्द्विष्टकांतरागात्सर्वेभजंतिस्वैरभावः ॥८६॥ आप्यूरापिप्रतिवाचायुनक्तंमाश्रद्दास्त्वंजनवा
देषुरुक्षा ॥ नानुस्मिक्तः प्रतिमल्लोमयांतंकश्चिन्नीतोयदिवाप्रेक्षपोरान् ॥८७॥ यत्कश्चित्त्वामवदिष्यु
स्कुमारंयद्दृश्यद्भुणतोहायमानं ॥ जातुभूयादविशिष्टंनरेभ्यानश्रद्दसेतद्दिसूक्ष्मदर्शी ॥८८॥ यच्चै-

DR BHAU DAJI MEMORIAL

॥कारग्रेभुजयुद्धानुरागाश्चातुर्वर्ण्यैसतिनायोधयेमौ॥नैतन्न्याय्यंभवतोवारणारेरंतःपूर्वान्गुणवान्ये
षुहंति॥८९॥कृष्णेवादक्षमयाहीनकल्पेवाचालत्वाज्जयिनीवेतरस्मिन्॥रंगोद्वेधंद्विमुखैःपक्षपातैः
सद्यःशोकप्रमदाभ्यामभेदि॥९०॥तस्मिन्कालेसुबलःस्वैरमूचेधर्मोद्देशैरलमस्मिन्ननार्ये दृष्टंताव
न्मदभंगेनशाधिस्थानेकिंवामृडनातीक्ष्णसाध्यो॥९१॥वाचाशातिक्रिययादीप्तिमत्तांविभ्रत्यार्यांविप
रीतंततोन्ये॥एवंचाद्यावद्भुधायांत्यवज्ञामभ्यादानेपरिणामेजघन्या॥९२॥शौर्य्यायात्रातिशयीतावत्
मोन्यंधावाश्रूरःक्रियेवप्रगल्भो॥आर्यंलोकोप्यतिवादाक्षमत्वाद्नंयश्चप्रतिपद्येतविद्यां॥९३॥यद्ध्याहार्षी
र्मृडुपेयाधिकस्तन्मंचस्थानांहृदिकातर्यशंका॥कामोयंनस्वमनुत्कैवदद्यामल्लायास्मेभुजयुद्धोपहारां॥९४॥
॥त्वन्निकर्षेरुतसत्पक्षपातप्रीतिप्रोतंसदसःशोकशल्यं॥गुर्वंचमांधुरमेकोवहेयाराजाप्युच्चैर्भवतुप्रा
प्तकामः॥९५॥इत्युत्साहंसहसोद्दीपयंत्यावाचावासरव्युधृतिमत्याप्रयुक्तः॥चाणूरंप्रत्यवतस्थेमुकुंदःसैन्यं
बन्यःकरिणंसत्करीव॥९६॥पर्यासेनप्रतिमल्लेनतस्मिन्नंध्रेयोगंचिरमिष्टेनयांते॥आशामात्रप्रतिहर्षणा
राज्ञारामोप्याजौरुरुधेमुष्टिकाया॥९७॥भेरीस्थानेध्वनिमास्फोटितानांशिक्षाःशास्त्रोपहितादंशनाथै
स्वांगान्येवप्रणिधायायुधत्वेतेरातेनेद्विगुणंद्वंद्वयुद्धं॥९८॥दृष्ट्वादृष्टिंद्विषतोर्वंचयंतौनाशक्येतांप्रसभं
यत्प्रहर्त्तुं॥तावन्मात्रंजयपक्षपुरस्तादध्यारोपिस्वपरेरामहर्यौ॥९९॥बाहूबाह्यवसक्तेषुतेषुस्वस्वप्रज्ञा
समन्योन्यएव॥एतेनायंचिरमायोधयेदित्यत्कर्षेणप्रतिपदेसदस्ये॥१००॥प्रागातस्थेविषमंतद्यथान्य
स्तद्वेलोन्यादरिपक्षःपरस्तात्॥तस्मिन्कालेधृतिबंधान्नियुद्धेमातापित्रोरपिहृद्यंबभूव॥१०१॥एव
मत्तांनिनाय॥२॥मायामल्लोगदवत्कामतान्योमत्वाभातांलघुयाप्यात्यभावे॥एवंचास्तांरतयेलंयथा ॥५२॥
स्यातिशयंवर्तयंताधाश्चूर्ध्वाधःपरिवर्तक्रमेण॥४॥प्राप्तःशात्रोर्धशामित्येवदृष्ट्वायावल्लोकःपरिरब्धंददर्श॥
तावद्दर्पादर्पसर्पन्प्रसह्यमत्यानर्थेसंसदःसाधुवादे॥५॥चत्वारस्तेलघुयोग्यामहिम्नास्थानेस्थानेयुग
पद्दीप्यमाणाः॥स्वेडाप्रायाःसमतन्विन्निवोर्वीमुत्पिंजांतांबद्धभिर्द्वंद्वयुद्धे॥६॥क्रुध्यद्भिःप्रहितास्त्र
प्रगल्भोयेषोगगनंनिर्बिभेद॥तानन्योप्रतिमुष्टिप्रहारानंगैरंगैरचलास्तेप्रतीषु॥७॥पादोद्धूतान्यव
धूतानिकीलामुष्टिक्षेपोन्मथनानिप्रसृष्टाः॥अंघ्रासंगानरवयष्टिप्रयोगाइत्यन्योन्यंव्यदधीपन्नि
युद्धं ८॥सारस्तेषामचलेभ्योपिकश्चिद्भिन्नोमन्येकुलिशावर्जितेभ्यः॥येषामंगेष्वधिकारावसाराः
पेतुर्मोघंशतशोवज्रपाताः॥९॥अत्यन्योन्यंप्रतिकारैःकृतानामन्योन्यस्मादविरोषंचरंतः पर्याया
स्वांजयलक्ष्मींहरंतस्तेसंजह्रुःसदसःपक्षपातान्॥१०॥अंतःप्रीत्यावपुषोवोत्पतंत्योमंचांतेभ्योर
मयनपौरकांताः॥भत्यासन्नक्षितिपालप्रतीक्षाशून्यंशश्वज्जयशब्देनकृष्टं॥११॥मल्लोत्कर्षेधृति
भाजःपरस्त्रप्रासग्लानेरसक्तोजभर्तुः॥गूढोप्यंतःकरणेभावदोषःसर्वाकारस्फुटतामाजगाम
॥१२॥भाभिर्वाग्भिःस्वयमेवानिरागाराजाहर्षःसस्वजेमल्लयोर्यः॥चौरैःशंकाचकितैःसंहृताभिस्ता
भिःसख्योःसविशंकंकुमारैः॥१३॥तुर्यारावैर्जनतायाःप्रणादैरंगास्फोटध्वनिभिःसिंहनादैः॥माया
मल्लप्रतिमल्लाभिमर्दैरंगोवीसाप्रचलंतीधरेजो॥१४॥एवंमल्लौचिरमायोध्यहर्षंनीरागाणामतुलं
वर्द्धयित्वा॥कीर्तिप्राणैःसहमुष्ट्याहताभ्यामुज्जह्रातेनरसिंहावुभाभ्यां॥१५॥अन्येप्यदांतमनसः
शक्तांशक्ताधामल्लास्तयोःप्रययुरग्निपतंतिलीलां॥तुर्याप्यपोद्यचनृपःकरसंज्ञयैवशंकांहृदिन्य
पितेषुधृतिंबंधौ॥१६॥रंगाहृष्टैःकुरुतसाभिसरांकुमारोराष्ट्राद्विवासयतगोपकुलंहतस्वांभ्याधा
विवप्रहरतानकुंडभोनज्ञात्वापरंचपरपक्षरतंनिरुंध॥१७॥इत्युत्थितस्त्वसहसेधनदासरंगाद्वास्वानि
वाग्वगगनादभितोनिशांतो॥आत्मप्रतापमवतीर्णमुकुंदकालध्वस्तारिसारामपविध्वतिरोबभूव॥१८॥

उत्थापितौ प्रहरणाय नृपस्य सद्यः साक्षेपवागिषुविसर्गजयारुषोभौ॥ भीतेषयानरभसेभुदितायुधेन
वाष्पूरमुष्टिकरिपूरुरुधनुकंपा॥११९॥ दूरारंभविघातखेदिनिहरोरामेवपिभोस्तयोः साक्षाद्राजविरो
धसाध्वसयुतप्राग्दर्शनोत्सुक्ययोः॥ सेर्ष्यांतरितादितांतहृषितेकंसेनुषंगात्परोधित्यानंदपरंयदा
पतदितः प्रायोविषण्णंगतं॥१२०॥ ॥इतिश्रीमहाराजदेवीसिंहाज्ञानुवर्तिनः कविपंडितापर
नाम्नो मोहनभट्टस्य कृतावानंदांके पदसमुच्चये महाकाव्ये कंसवधे सिंहकाव्ये मल्लवधोना
माऽष्टादशः सर्गः॥१८॥ ॥इतिलकारार्थौः॥ ॥अथ कृत्प्रत्ययाः॥ ॥श्रीगोपालजय॥ ॥
अमंगलांतोत्सवसानुतापेजनेगतेपार्थिवैरभीरुः॥ स्वमेवनंदोपिनिवेशदेशंययौकुमारानुचरानु
यातः॥१॥ समुत्सुकोपेहकवैरशुद्ध्याघृणोदयेनाप्यनुतप्यमानौ॥ बलाच्युतौतावदचिंतयेतांतमेव
भूयोरिपुसन्निपातं॥२॥ द्विषोनुसाराच्चकितेरजन्यामुपक्रमिष्यत्यधिपेजनीनां॥ कुमारयोरुक्तत
यापरस्मिन्विचिन्वतोरेवपुनः प्रहारं॥३॥ अपार्थिवालंकरणप्रभाभिः प्रतीकदीप्तिद्विगुणीकृताभिः
अधोमुखेनाजरसाजवेनमहोल्कयातुल्यनभःप्रवृत्तिः॥४॥ अधिप्रकृष्टांतरदर्शनेपिप्रयत्नलक्ष्या
कृतिसन्निवेशः॥ प्रसादसोम्योप्यनुभावशंक्यः पुरोवतीर्णः किलदेवदूतः॥५॥ ॥त्रिभिर्विशेषकं॥
यथातमानर्वुरदृष्टपूर्वजनाः प्रभावानमितैः शिरोभिः॥ तथेंद्रलोकप्रथितप्रवृत्तिमामानुषोमानुषलिं
गमीशं॥६॥ असंस्पृशन्नेवपदाधरित्रीकृतोयमित्युक्तजनानुभूतः॥ सतावदात्मानमविक्लवात्माशशी
ससंदेशहरंसुराणां॥७॥ उपेंद्रमाभाष्यसगौरवाभ्यांतदक्षणाभ्यांगुरुणापिदृष्टं॥ सवाचिकंवाक्पति
शिष्यसृष्टंजगोनिसृष्टार्थगणाग्रयार्थं॥८॥ हरपुराविष्टिरपेतनिष्टः स्मृतस्त्वमेकोजगदंतरात्मा
यतेतयस्मारयितुंजनस्ते सभानधेकिंचलयेन्नदीपं॥९॥ तथापिमायानरसंभवेस्मिन्यदृच्छयाकर्ष
सिमोहलीलां॥ तदंतरंप्राप्यतवोपदेशोभजामिवाचालपथप्रवृत्तिं॥१०॥ द्विषोकसांगोत्यमनुष्यकल्पं

ब्रवीमियत्तेस्मृतयेधुनाहो॥ इहावधेयंभवताक्षणोवासदोपलंभ्येनविचारणीयं॥१०॥ यद्वायदापश्यसिधर्म
हीनेजगत्यधर्मेणसमेधितव्यं॥ तदातदात्मानमनन्यसृज्यंसृजस्यवन्ध्येथयदृच्छयेवा॥११॥ ममांगपिभोस्ति
षुजन्मसुखंवरप्रदः पुत्रतयाभिजातः सकृत्प्रयुक्तोप्यमृषोद्यभूतये सपोनरुक्त्याहिसतांप्रियोक्तिः॥१२॥
पतिः प्रजानांकिलपृश्निजानिस्तपःप्रजार्थीसुतपाश्चवाराः॥ तवापिवर्यस्यवरातिसर्गेसभाद्दतत्वादृशपु
त्रजन्मा॥१३॥ अलभ्यसादृश्यतयात्वयात्मासुतीकृतस्त्वस्यसपृश्निगर्भः॥ अथादितोमामनुकस्यपत्वेप्य
भूरुपेंद्रस्तनयोस्यभूयः॥१४॥ कलत्रिणोस्येवभवेत्तृतीयेप्रजापतेरेषगतोसिजन्मं महीहितप्रार्थनया-
विधातुस्त्रिलोकपाण्यस्यपणायतस्त्वां॥१५॥ जितारणेदेवगणेनशश्वन्मृदेवजन्मातरितस्वरूपाः इमते
